शब्दार्थ– तत्करस्पर्शेन = उसके हाथ के स्पर्श से। उच्छ्वसतः इव = साँस लेते हुए से। झटिति = सहसा। चन्द्रधवलं = चन्द्रमा के समान उज्ज्वल। उज्जगाम = निकली। अनन्तरम् = इसके बाद। अन्तरिक्षे = आकाश में। क्षरन्तीव अमृतम् = अमृत की वर्षा सी करती हुई। अशरीरिणी वाक् = आकाशवाणी। अश्रूयत = सुनी। समाश्वासयितव्या वर्तसे = धैर्य दिलाने के योग्य हो। मत्तेजसा = मेरे तेज से। आप्याय्यमानम् = सिंचित होकर। अविनाशि = नाश रहित होकर। त्वत्समागमाय = तुम्हारे मिलने के लिए। मत्तेजोमयम् = मेरे तेज से पूर्ण। अन्तरात्मना = अन्तरात्मा से। कृतशरीरान्तरसंक्रान्तेः = दूसरे शरीर में चले जाने वाले। योगिनः इव = योगी के समान। भवत्योः तुम दोनों के। प्रत्ययार्थम् = विश्वास के लिए। आशापक्षयात् = शाप के नष्ट होने के समय तक। आस्ताम् = रहे। आसमागमप्राप्तेः = मिलन होने के समय तक।

हिन्दी अनुवाद– उसके हाथ के स्पर्श से साँस लेते हुए से चन्द्रापीड के शरीर से चन्द्रमा जैसी उज्ज्वल ज्योति निकलकर

ऊपर चली गयी और अमृत वर्षा करती हुई आकाशवाणी सुनाई पड़ी– महाश्वेते, मैं तुम्हें फिर आश्वासन दे रहा हूँ। पुण्डरीक का शरीर मेरे लोक में मेरे तेज से सिंचित होकर फिर तुमसे मिलने के लिए पड़ा है। यह दूसरा मेरे तेज से पूर्ण, नाश-रहित और कादम्बरी के हाथों के स्पर्श से सिंचित अपनी आत्मा से दूसरे शरीर में चले जाने वाले योगी के शरीर के समान चन्द्रापीड का शरीर यहीं तुम दोनों के विश्वास के लिए शाप नष्ट होने के समय तक रहेगा। अतः मिलन होने तक उसकी रक्षा करना।

व्याकरणात्मक टिप्पणी– तत्करस्पर्शेन = तत् + कर + स्पर्शेन। अन्तरात्मना = अन्तः + आत्मना। प्रत्ययार्थम् = प्रत्यय + अर्थम्।

॥ प्रश्नोत्तरः ॥

प्रश्न 1. **प्रस्तुत गद्यांशस्य पुस्तकं लेखकञ्च नाम लिखत।**

उत्तर– प्रस्तुत गद्यांशस्य पुस्तकं नाम 'चन्द्रापीडकथा' अस्य लेखकः च 'बाणभट्टः' अस्ति।

प्रश्न 2. **"तत्करस्पर्शेन उच्छ्वसत इव चन्द्रापीडदेहात् झटिति अव्यक्तरूपं चन्द्रधवलं ज्योतिः उज्जगाम।" रेखांकित अंश का अनुवाद कीजिए।**

उत्तर– उसके हाथ के स्पर्श से साँस लेते हुए से चन्द्रापीड के शरीर से चन्द्रमा के समान उज्ज्वल ज्योति निकलकर ऊपर चली गयी।

प्रश्न 3. **कस्याः करस्पर्शेन चन्द्रापीडदेहात् अव्यक्तरूपं चन्द्रधवलं ज्योतिः उज्जगाम?**

उत्तर– कादम्बरीकरस्पर्शेन चन्द्रापीडदेहात् अव्यक्तरूपं चन्द्रधवलं ज्योतिः उज्जगाम।

प्रश्न 4. **कस्य देहात् अव्यक्तरूपं चन्द्रधवलं ज्योतिः उज्जगाम?**

उत्तर– चन्द्रापीडदेहात् अव्यक्तरूपं चन्द्रधवलं ज्योतिः उज्जगाम।

प्रश्न 5. **क्षरन्तीव अमृतम् अशरीरिणी वाक् का अश्रूयत्?**

उत्तर– क्षरन्तीव अमृतम् अशरीरिणी वाक् महाश्वेता अश्रूयत्।

➥ **पत्रलेखा मुहूर्तमिव निश्चेतना सती तस्य ज्योतिषः स्पर्शेन लब्धसंज्ञा उत्थाय आविष्टेव वेगात् धावित्वा, परिवर्धकहस्तात् इन्द्रायुधम् आच्छिद्य, तनैव सह आत्मानम् अच्छोदसरसि अक्षिपत्। तयोः निमज्जनसमयानन्तरमेव, तस्मात् सरस्सलिलात् शिरसि जटाकलापम् उद्वहन् उद्विग्नाकृतिः तापसकुमारः सहसैव उदतिष्ठत्। उत्थाय च दूरत एव विलोकयन्तीम् महाश्वेताम् उपसृत्य बभाषे– "गन्धर्वराजपुत्रि! जन्मान्तरात् आगतोऽपि प्रत्यभिज्ञायतेऽयं जनः, न वा?" इति। सा त्वेवं पृष्टा शोकानन्दमध्यवर्तिनी ससंभ्रमम् उत्थाय कृतप्रणामा प्रत्यवादीत्- "भगवन् कपिञ्जल! नाहम् एवंविधा अपुण्यवती, या भवन्तमपि न प्रत्यभिजानामि। तत् कथय 'केनासौ उत्क्षिप्य नीतः? किं वा तव उपजातम्, येन एतावता कालेन वार्तापि न दत्ता। कुतो वा त्वम् एकाकी देवेन विना समायातः" इति।**

शब्दार्थ– मुहूर्तमिव = थोड़ी देर। निश्चेतना सती = चेतना रहित-सी होती हुई। ज्योतिषः स्पर्शेन = ज्योति के स्पर्श से। लब्धसंज्ञा = होश में आकर। उत्थाय = उठकर। आविष्टा इव = भूत के वश में हुई सी। वेगात् धावित्वा = वेग से दौड़कर। परिवर्धकहस्तात् = साईस के हाथ से। आच्छिद्य = छीनकर। अक्षिपत् = फेक दिया। तयोः = उन दोनों के। निमज्जनसमयानन्तरम् एव = डूबने के बाद ही। सरस्सलिलात् = तालाब के जल से। शिरसि = सिर पर। जटाकलापम् उद्वहन् = जटाएँ धारण किये हुए। उद्विग्नाकृतिः = घबड़ाया हुआ। उदतिष्ठत् = निकला। विलोकन्तीम् = देखने वाली। बभाषे = बोला। जन्मान्तरात् = दूसरे जन्म से। प्रत्यभिज्ञायते = पहचाना जाता है। शोकानन्दमध्यवर्तिनी = शोक और आनन्द के बीच स्थित। ससम्भ्रमम् = झटके के साथ। एवं विधा = इस प्रकार। अपुण्यवती = पापिनी। नीतः = ले गया। तव उपजातम् = तुम्हारा हुआ। वार्तापि = समाचार। समायातः = आए।

हिन्दी अनुवाद– पत्रलेखा क्षण भर चेतनाहीन-सी होकर फिर उस प्रकाश से होश में आकार भूत-प्रेत से ग्रसित जैसी दौड़कर साईस के हाथ से इन्द्रायुध को छीनकर उसी के साथ अच्छोद तालाब में कूद पड़ी। उन दोनों के डूबने के बाद ही उस तालाब के जल से सिर पर जटाएँ धारण किये घबड़ाया हुआ सा एक तपस्वी कुमार निकला। वह निकलकर दूर ही से देखने वाली महाश्वेता के पास आकर बोला– हे गन्धर्वराज की पुत्री, दूसरे जन्म से आये हुए इस व्यक्ति को आप पहचान रही हैं या नहीं? उसके ऐसा पूछने पर शोक और आनन्द के बीच स्थित महाश्वेता ने झटके से उठकर उसे प्रणाम करके कहा– भगवान् कपिंजल मैं इतनी पापिनी नहीं हूँ जो आपको नहीं पहचानूँ। इसलिए बताइये उन्हें कौन उठाकर ले गया? आपको क्या हुआ जो इतने दिन तक समाचार भी नहीं दिया। आप देव पुण्डरीक के बिना अकेले ही क्यों आये।

व्याकरणात्मक टिप्पणी– मुहूर्तमिव = मुहूर्तम् + इव। निश्चेतना = निः + चेतना। परिवर्धकहस्तात् = परिवर्धकस्य हस्तात्। सरस्सलिलात् = सरः + सलिलात्। उद्विग्नाकृतिः = उद्विग्न + आकृतिः। जन्मान्तरात् = जन्म + अन्तरात्।

॥ प्रश्नोत्तरः ॥

प्रश्न 1. उपर्युक्त गद्यांश की पुस्तक और लेखक का नाम लिखिए।

उत्तर– प्रस्तुत गद्यांश की पुस्तक का नाम 'चन्द्रापीडकथा' और इसके लेखक 'बाणभट्ट' हैं।

प्रश्न 2. तापसकुमारः कः आसीत्।

उत्तर– तापसकुमारः भगवन् कपिञ्जलः आसीत्।

प्रश्न 3. 'गन्धर्वराजपुत्रि! जन्मान्तरात् आगतोऽपि प्रत्यभिज्ञायतेऽयं जनः, न वा?' रेखांकित अंश का अनुवाद कीजिए।

उत्तर– हे गन्धर्वराजपुत्रि! दूसरे जन्म से आये इस व्यक्ति को आप पहचानती हैं या नहीं?

प्रश्न 4. का अच्छोदसरसि अक्षिपत्?

उत्तर– पत्रलेखा अच्छोदसरसि अक्षिपत्।

प्रश्न 5. पत्रलेखा केन सह अच्छोदसरसि अक्षिपत्?

उत्तर– पत्रलेखा इन्द्रायुधेन सह अच्छोदसरसि अक्षिपत्।

➥ **स तु प्रत्यवादीत् – 'गन्धर्वराजपुत्रि! श्रूयताम्– अहं हि कृतार्तप्रलापामपि त्वाम् एकाकिनीम् उत्सृज्य, तं पुरुषम् अनुबध्नन् जनेव उदपतम्। स तु मे प्रतिवचनम् अदत्वैव अतिक्रम्य तारागणम् चन्द्रलोकम् अगच्छत्। तत्र च महोदयाख्यायां सभायाम् इन्दुकान्तमये महति पर्यङ्के तत् पुण्डरीकशरीरं स्थापयित्वा, माम् अवादीत्– कपिञ्जल! जानीहि मा चन्द्रमसम्। अहं खलु अनेन ते प्रियवयस्येन कामापधात् जीवितम् उत्सृजता निरपराधः संशप्तः– ''दुरात्मन् इन्दुहतक ! यथाहं त्वया करैः संताप्य प्राणैः वियोजितः, तथा त्वमपि भारतेवर्षेऽस्मिन् जन्मनि जन्मन्येव उत्पन्नानुरागः असंप्राप्तसमागमसुखः तीव्रतरां हृदयवेदनाम् अनुभूय जीवितम् उत्स्त्रक्षयसि'' इति। अहं तु, 'किमनेन अगणितात्मदोषेन निरागाः शप्तोऽस्मि' इत्युत्पन्नकोपः 'त्वमपि मत्तुल्यसुखदुःख एव भविष्यसि' इति प्रतिशापम् अस्मै प्रायच्छम्।**

शब्दार्थ– प्रत्यवादीत् = उत्तर दिया। कृतार्तप्रलापामपि = दुःख के साथ रोने वाली। एकाकिनीम् = अकेली को। उत्सृज्य = छोड़कर। अनुबन्धनन् = पीछा करता हुआ। उदपतम् = ऊपर चला गया। जवेन = वेग से। प्रतिवचनम् = उत्तर। अदत्वैव = दिये बिना ही। अतिक्रम्य = पार करके। महोदयाख्यायाम् = महोदय नाम की। महति पर्यङ्के = बहुत बड़ी शैय्या पर। स्थापयित्वा = रखकर। अवादीत् = कहा। जानीहि = समझो। चन्द्रमसम् = चन्द्रमा। प्रियवयस्येन = प्रिय मित्र ने। कामापराधात् = काम के दोष से। जीवितम् उत्सृजता = जीवन त्याग करने वाले। संशप्त = शाप दिया गया। करै संताप्य = किरणों से जलाकर। प्राणैः वियोजितः = प्राणों से अलग किया गया। जन्मनि जन्मनि = कई जन्मों में। उत्पन्नानुरागः = प्रेम हो जाने पर। असम्प्राप्तसमागमसुखः = मिलन का सुख पाये बिना। तीव्रतराम् = कठिन। हृदयवेदनाम् = हृदय की पीड़ा। अनुभूय = अनुभव करके। जीवितम् = जीवन को। उत्स्त्रक्ष्यसि = छोड़ोगे। अगणितात्मदोषेण = अपना दोष न देखने वाले। निरागाः = निरपराध। शप्तोस्मि = शाप दिया गया हूँ। उत्पन्नकोपः = क्रोधः आ जाने से। प्रतिशापम = शाप के बदले शाप, प्रायच्छम् = दिया।

हिन्दी अनुवाद– कपिंजल ने कहा– गन्धर्वराज पुत्रि महाश्वेते! सुनो– मैं दुःख के साथ रोती हुई आपको अकेली छोड़कर उस पुरुष का पीछा करते हुए वेग से ऊपर चलता गया। वह मेरी बातों का उत्तर दिये बिना ही तारों को पार करके चन्द्रलोक में चला गया। वहाँ महोदय नाम की सभा में इन्दुकान्तमणि की बहुत बड़ी शैय्या पर पुण्डरीक के शरीर को रखकर उसने मुझसे कहा–कपिंजल तुम मुझे चन्द्रमा समझो। तुम्हारे इस मित्र ने कामदोष से अपने प्राणों का परित्याग करते समय मुझे शाप दिया कि पापी चन्द्रमा तुमने अपनी किरणों से मुझे मार डाला है, अतः तुम भी इस भारतवर्ष में दो जन्म लेकर प्रेम उत्पन्न होने पर बिना समागम-सुख पाये हृदय की कठिन पीड़ा का अनुभव करके प्राणों का परित्याग करोगे। मुझे क्रोध आ गया और मैंने भी उसे शाप के बदले शाप दे दिया कि तुम्हें भी मेरे ही समान सुख-दुःख होगा।

व्याकरणात्मक टिप्पणी– कृतार्तप्रलापामपि = कृतःआर्तप्रलापः यया ताम्। अदत्वैव = अदत्व + एव। महोदयाख्यायाम् = महोदय + आख्याम्। उत्पन्नानुरागः = उत्पन्न + अनुरागः।

।। प्रश्नोत्तरः ।।

प्रश्न 1. प्रस्तुत गद्यांशस्य पुस्तकं लेखकञ्च नाम लिखत।
उत्तर– प्रस्तुत गद्यांशस्य पुस्तकं नाम 'चन्द्रापीडकथा' अस्य लेखकः च 'बाणभट्टः' अस्ति।
प्रश्न 2. 'त्वमपि मत्तुल्यसुखदुःख एव भविष्यसि।' रेखांकित अंश का अनुवाद कीजिए।
उत्तर– तुम्हें भी मेरे ही तरह सुख-दुःख होगा।
प्रश्न 3. कः प्रत्यवादीत्?
उत्तर– कपिञ्जलः प्रत्यवादीत्।
प्रश्न 4. कः तं पुरुषं अनुबध्नन् जवेन उदपतम्?
उत्तर– कपिञ्जलः तं पुरुषं अनुबध्नन् जवेन उदपतम्।
प्रश्न 5. कस्य प्रतिवचनम् अदत्वैव चन्द्रलोकम् अगच्छत्?
उत्तर– कपिञ्जल्य प्रतिवचनम् अदत्वैव चन्द्रलोकम् आगच्छत्।

➥ **अपगतामर्षः विमृशन् महाश्वेताव्यतिकरमस्य अधिगतवानस्मि– ''वत्सा हि महाश्वेता, मन्मयूखसंभवात् अप्सरःकुलात् लब्धजन्मनि गौर्याम् उत्पन्ना। तया चायं भर्ता स्वयं वृतः। अनेन च स्वयं कृतादेव दोषात् मया सह मर्त्यलोके वरद्वयम् अवश्यम् उत्पत्तव्यम्। अन्यथा जन्मनि जन्मनि इत्येषा वीप्सा न चरितार्था भवति। तत् यावदयं शापदोषात् अपैति तावत् अस्य शरीस्य मा विनाशः भूत् इति मया इदम् उत्क्षिप्य समानीतम्। वत्सा च महाश्वेता समाश्वासिता। अधुना त्वं गत्वा एनं वृत्तान्तम् श्वेतकेतवे निवेदय। महाप्रभावोऽसौ कदाचित् अत्र प्रतिक्रियां कांचित् करोति'' इत्युक्त्वा मां व्यसर्जयत्।**

शब्दार्थ– अपगतामर्ष = जिसका क्रोध दूर हो गया। विमृशन् = विचार करते हुए। महाश्वेताव्यतिकरम् = महाश्वेता का सम्बन्ध। मन्मूखसम्भवात् = मेरी किरणों से उत्पन्न। अप्सरसः कुलात् = अप्सराओं के कुल से। लब्धजन्मनि = जन्म लेने वाली। स्वयं वृत्तः = स्वयं वरण कर लिया है। कृतादेव दोषात् = स्वयं किये दोषों से। वारद्वयम् = दो बार। उत्पतव्यम् = उत्पन्न होगा। इत्येषा वीप्सा = यह दो बार कहना। चरितार्था = सफल। शापदोषात् = शाप दोष से। अपैति = मुक्त होता है। मा विनाशः भूतः = विनाश न होवे। उत्क्षिप्य = उठकर। आनीतम् = लाया हूँ। समाश्वासिता = आश्वासन दी गई है। अधुना = अब गत्वा = जाकर। श्वेतकेतवे = श्वेतकेतु को। निवेदय = बताओ। महाप्रभावोऽसौ = वह महान् प्रभाव वाले। कदाचित् = शायद। प्रतिक्रियाम् = उपाय। कांचित् = कोई। व्यसर्जयत् = भेजा।

हिन्दी अनुवाद– क्रोध दूर हो जाने पर मैंने विचार किया कि महाश्वेता के साथ इसके सम्बन्ध को जान गया हूँ। पुत्री महाश्वेता मेरी किरणों से उत्पन्न अप्सराओं के कुल में जन्म लेने वाली गौरी से उत्पन्न हुई है। उसने इसे स्वयं पति रूप में वरण किया है। वह स्वयं अपने पापों से मेरे साथ मृत्युलोक में दो बार उत्पन्न होगा। नहीं तो जन्म-जन्म दो बार कहना चरितार्थ नहीं होगा। इसलिए शाप से मुक्त होने के समय तक इसका शरीर नष्ट न हो जाय, इसलिए मैं इसे उठाकर लाया हूँ। पुत्री महाश्वेता को भी आश्वासन दे दिया है। इस समय तुम जाकर यह समाचार श्वेतकेतु को सुनाओ। वह अत्यन्त प्रभावशाली हैं। सम्भवतः इसका कोई उपाय करें। ऐसा कहकर उन्होंने मुझे विदा दिया।

व्याकरणात्मक टिप्पणी– अपगतामर्षः = अपगतः अमर्षः यस्य सः। मन्मयूखसम्भवात् = मन् + मयूखसम्भवात्। गत्वा = गम् +क्त्वा।

।। प्रश्नोत्तरः ।।

प्रश्न 1. उपर्युक्त गद्यांश की पुस्तक और लेखक का नाम लिखिए।
उत्तर– प्रस्तुत गद्यांश की पुस्तक नाम 'चन्द्रापीडकथा' और इसके लेखक 'बाणभट्ट' हैं।
प्रश्न 2. ''वत्सा हि महाश्वेता, मन्मयूखसंभवात् अप्सरः कुलात् लब्धजन्मनि गौर्याम् उत्पन्ना।'' रेखांकित अंश का अनुवाद कीजिए।
उत्तर– पुत्री महाश्वेता मेरी किरणों से उत्पन्न अप्सराओं के कुल में जन्म लेने वाली गौरी से उत्पन्न हुई है।

प्रश्न 3. अपगतामर्षः कः?

उत्तर– अपगतामर्षः कपिञ्जलः।

प्रश्न 4. कः महाश्वेताव्यतिकरमस्य अधिगतवानस्ति?

उत्तर– कपिञ्जलः महाश्वेताव्यतिकरमस्य अधिगतवानस्ति।

प्रश्न 5. अप्सरःकुलात् लब्धजन्मनि गौर्यान् उत्पन्न का?

उत्तर– महाश्वेता अप्सरः कुलात् लब्धजन्मनि गौर्यान् उत्पन्ना।

➡ **अहं तु विना वयस्येन शोकावेगान्धः गीर्वाणवर्त्मनि प्रधावन् अतिक्रोधनं वैमानिकम् एकम् अलंघयम्। स तु दहन्निव निरीक्ष्य अब्रवीत्– ''दुरात्मन्! यदेवम् अतिविस्तीर्ण गगनमार्गे त्वया अहं तुरङ्गमेणेव उल्लंघितः, तस्मात् तुरङ्गम एव भूत्वा मर्त्यलोके अवतर'' इति। अहं तु तं कृताञ्जलिः अवदम्– 'भगवन्! वयस्यशोकान्धेन त्वं मया उल्लङ्घितः, नावज्ञया। तत्प्रसीद। उपसंहार शापम् इमम्'' इति। स तु मां पुनः अवादीत्– ''यन्मयोक्तं तत् नान्यथा भवितुमर्हति। तदेतत् ते करोमि। कियन्तमपि कालं यस्य वाहनताम् उपयास्यसि, तस्यैव अवसाने स्नात्वा विगतशापः भविष्यसि'' इति।**

शब्दार्थ– वयस्येन = मित्र के। शोकावेगान्धः = शोक के कारण अन्धा। गीर्वाणवर्त्मनि = आकाश मार्ग में। प्रधावन् = दौड़ते हुए। अतिक्रोधनम् = अत्यन्त क्रोधी। वैमानिकम् = विमान पर चढ़े देवता को। अलंघयम् = उल्लंघन किया। दहन् = जलता हुआ। निरीक्ष्य = देखकर। अति विस्तीर्ण = अत्यन्त चौड़े। तुरंगमेणेव = घोड़े की तरह। उल्लंघितः = उल्लंघन किया गया। भूत्वा = होकर। अवतर = उतरो। कृतांजलिः = हाथ जोड़कर। अवदम् = कहा। नावज्ञया = अपमान से नहीं। तत्प्रसीद = अतः कृपा करो। उपसंहर = हटाओ। नान्यथा = व्यर्थ नहीं। भवतुमर्हति = हो सकता। वाहनताम् उपयास्यसि = सवारी बनोगे। अवसाने = अन्त होने पर। विगतशापः = शाप रहित।

हिन्दी अनुवाद– मैंने मित्र के बिना शोक के आवेग में अंधा होकर आकाश मार्ग में दौड़ते हुए एक विमान पर बैठे देवता का उल्लंघन कर दिया जिससे वह जलता हुआ सा मेरी ओर देखकर बोला– दुष्ट, इतने चौड़े आकाशमार्ग के होते हुए भी तुमने घोड़े की तरह मेरा उल्लंघन किया है। इसलिए घोड़ा बनकर मृत्युलोक में जाओ। मैंने हाथ जोड़कर कहा– भगवन्! मित्र शोक में अन्धा होकर आपका उल्लंघन किया है, आपका अपमान करने के लिए नहीं। अतः कृपा करें शाप को दूर कीजिए। उसने फिर मुझसे कहा– मैंने जो कहा है व्यर्थ नहीं हो सकता। तुम्हारे लिए मैं इतना करता हूँ कि तुम बहुत समय तक जिसकी सवारी में रहोगे उसके मर जाने पर स्नान करके पापरहित हो जाओगे।

व्याकरणात्मक टिप्पणी– शोकावेगान्धः = शोक + आवेग + अन्धः। तुरंगमेणेव = तुरंगमेण + एव। भूत्वा = भू + क्त्वा। कृतांजलिः = कृत + अंजलिः। नावज्ञया = न + अवज्ञया। नान्यथा = न + अन्यथा।

|| प्रश्नोत्तरः ||

प्रश्न 1. प्रस्तुत गद्यांशस्य पुस्तकं लेखकञ्च नाम लिखत।

उत्तर– प्रस्तुत गद्यांशस्य पुस्तकं नाम 'चन्द्रापीडकथा' अस्य लेखकः च 'बाणभट्टः' अस्ति।

प्रश्न 2. ''भगवन्! वयस्यशोकान्धेन त्वं मया उल्लङ्घितः।'' रेखांकित अंश का अनुवाद कीजिए।

उत्तर– भगवान्! मित्र के शोक से अन्धा होकर मैंने आपका उल्लङ्घन किया है।

प्रश्न 3. कः बिना वयस्येन शोकावेगान्धः बभूव?

उत्तर– कपिञ्जल बिना वयस्येन शोकावेगान्धः बभूव।

प्रश्न 4. कः गीर्वाणवर्त्मनि प्रधावन् अतिक्रोधनं वैमानिकम् एकम् अलंघयत्।

उत्तर– कपिञ्जल गीर्वाणवर्त्मनि प्रधावन् अतिक्रोधनं वैमानिकम् एकम् अलंघयत्।

प्रश्न 5. कः तं कृताञ्जलिः अवदत्?

उत्तर– कपिञ्जलः तं कृताञ्जलिः अवदत्।

➡ **एवमुक्तस्तु तमहम् अवदम्– ''भगवन्! यद्येवम् ततः विज्ञापयामि। तेनापि मत्प्रियवयस्येन पुण्डरीकेण चन्द्रमसा सह शापदोषात् मर्त्यलोक एव उत्पत्तव्यम्। तत् एतावन्तमपि भगवान् प्रसादं करोतु मे दिव्येन चक्षुषा अवलोक्य,**

यथा– तुरङ्गमत्वेऽपि मत्प्रियवयस्येन सह अवियोगेन कालः यायात्'' इति।

शब्दार्थ– अवदम् = कहा। विज्ञापयामि = निवेदन करता हूँ। मत्प्रियवयस्येन = मेरे प्रिय मित्र से। चन्द्रमसा सह = चन्द्रमा के साथ। उत्पत्तव्यम् = उत्पन्न होगा। एतावन्तमपि = इतना भी। प्रसादं करोतु = कृपा करो। अवियोगेन = बिना वियोग के ही। कालः यायात् = समय बीते।

हिन्दी अनुवाद– मैंने शाप देनेवाले उस देवता से कहा कि भगवन् यदि ऐसा है तो आपसे निवेदन करता हूँ, मेरा प्रिय मित्र पुण्डरीक भी शाप के कारण चन्द्रमा के साथ मृत्युलोक में उत्पन्न होगा। अतः दिव्य नेत्रों से देखकर आप यह भी कृपा करें कि घोड़ा होने पर भी मित्र के साथ ही रहकर मेरा समय बीते।

व्याकरणात्मक टिप्पणी– मत्प्रियवयस्येन = मत् + प्रियवयस्येन। एतावन्तमपि = एतावन्तम् + अपि।

॥ प्रश्नोत्तरः ॥

प्रश्न 1. उपर्युक्त गद्यांश की पुस्तक और लेखक का नाम लिखिए।

उत्तर– प्रस्तुत गद्यांश की पुस्तक का नाम 'चन्द्रापीडकथा' और इसके लेखक 'बाणभट्ट' हैं।

प्रश्न 2. 'तुरङ्गमत्वेऽपि मत्प्रियवयस्येन सह अवियोगेन कालः यायात्।' रेखांकित अंश का अनुवाद कीजिए।

उत्तर– अश्व होने पर भी मित्र के साथ ही रहकर मेरा समय बीते।

प्रश्न 3. कपिञ्जलः कम् अवदत्?

उत्तर कपिञ्जलः वैमानिकम् अवदत्।

प्रश्न 4. मत्प्रियवयस्येन पुण्डरीकेण केन सह शापदोषात् मर्त्यलोक एव उत्पत्तव्यम्?

उत्तर– मत्प्रियवयस्येन पुण्डरीकेण चन्द्रमसा सह शापदोषात् मर्त्यलोक एव उत्पत्तव्यम्।

प्रश्न 5. तुरङ्मत्वेऽपि केन सह अवियोगेन कालः यायात्?

उत्तर– तुरङ्मत्वेऽपि प्रियवयस्येन सह अवियोगेन कालः यायात्।

➥ **स तु एवम् उक्तः मुहूर्तमिव ध्यात्वा पुनः माम् अवादीत्– 'उज्जयिन्याम् अपत्यहेतोः तपस्यतः तारापीडनाम्नः राज्ञः चन्द्रमसा तनयत्वम् उपगन्तव्यम्। वयस्येनापि ते पुण्डरीकेण तन्मन्त्रिण एव शुकनासस्य। त्वमपि तस्य चन्द्रात्मनः राजपुत्रस्य वाहनताम् उपयास्यसि'' इति। अहं तु तद्वचनानन्तरमेव अधः स्थिते महोदधौ न्यपतम्। तस्माच्च तुरङ्गीभूयैव उदतिष्ठम्। संज्ञा तु मे तुरङ्गमत्वेऽपिम त्यपगता इति। येन अयं मया अस्यैवार्थस्य कृते किन्नरमिथुनानुसारी भूमिम् एताम् आनीतः देवश्चन्द्रमसोऽवतारः चन्द्रापीडः। योऽप्यसौ प्राक्तनानुरागसंस्कारात् अभिलषन् अजानत्या त्वया शापाग्निना निर्दग्धः स मे वयस्यस्य पुण्डरीकस्यावतारः'' इति।**

शब्दार्थ– उक्तः = कहे जाने पर। मुहूर्तमिव ध्यात्वा = थोड़ी देर तक ध्यान करके। माम् मुझको। अवादीत् = कहा। अपत्यहेतोः = सन्तान के लिए। तपस्यतः = तप करने वाले। तनयत्वम् = पुत्रत्व। उपगन्तव्यम् = प्राप्त होगा। वयस्येनापि = मित्र भी। वाहनताम् उपयास्यसि = सवारी बनोगे। तद्वचनानन्तरमेव = उसके कहने के बाद ही। अधः स्थिते = नीचे स्थित। महोदधौ = समुद्र में। न्यपतम् = गिरा। तस्माच्च = और उससे। तुरंगीभूय = घोड़ा बनकर। उदतिष्ठम् = निकला। संज्ञा = चेतना। न व्यपगता = नहीं गई। अस्यैवार्थस्य कृते = इसी काम के लिए। किन्नरमिथुनानुसारी = किन्नर घोड़े का पीछा करने वाले। भूमिम् एताम् = इस भूमि को। आनीतः = लाया गया। देवश्चन्द्रमसोऽवतारः = देव चन्द्रमा का अवतार। प्राक्तनानुरागसंस्कारात् = पूर्व प्रेम के संस्कार से। अभिलशन् = चाहते हुये। अजानन्त्या = न जानने वाली। शापाग्निना निर्दग्धः = शाप की अग्नि से जलाया गया है।

हिन्दी अनुवाद– मेरे ऐसा कहने पर उसने थोड़ी देर ध्यान करके फिर मुझसे कहा– उज्जयिनी में सन्तान के लिए तप करने वाले तारापीड नाम के राजा का पुत्र चन्द्रमा होगा और तुम्हारा मित्र पुण्डरीक उसके मन्त्री शुकनास का पुत्र होगा। तुम उसी चन्द्रमा के अवतार राजपुत्र चन्द्रापीड के वाहन बनोगे। मैं उसके यह कहने के साथ ही नीचे स्थित समुद्र में गिर पड़ा और घोड़ा होकर निकला। घोड़ा होने पर भी मुझे पूर्व जन्म की चेतना नहीं गई थी। इसी कार्य के लिए किन्नरों का पीछा करने वाले चन्द्रमा के अवतार चन्द्रापीड को मैं इस स्थान पर ले आया था। पूर्व जन्म के प्रेम के संस्कार के कारण तुम्हारी कामना करने वाला यह अनजान में जो तुम्हारे द्वारा शाप की अग्नि में जला डाला गया है वह मेरे मित्र पुण्डरीक का ही अवतार था।

व्याकरणात्मक टिप्पणी– मुहूर्तमिव = मुहूर्तम् + इव। वयस्येनापि = वयस्येन + अपि। तद्वचनानन्तरमेव = तत् + वचन + अन्तरम् + एव। तस्माच्च = तस्मात् + च। देवश्चन्द्रमसोऽवतारः = देवः + चन्द्रमसः + अवतारः।

॥ प्रश्नोत्तरः ॥

प्रश्न 1. प्रस्तुत गद्यांशस्य पुस्तकं लेखकञ्च नाम लिखत।

उत्तर– प्रस्तुत गद्यांशस्य पुस्तकं नाम 'चन्द्रापीडकथा' अस्य लेखकः च 'बाणभट्टः' अस्ति।

प्रश्न 2. 'त्वमपि तस्य चन्द्रात्मनः राजपुत्रस्य वाहनताम् उपयास्यसि।' रेखांकित अंश का अनुवाद कीजिए।

उत्तर– तुम भी उसी चन्द्रमा के अवतार राजपुत्र चन्द्रापीड के वाहन बनोगे।

प्रश्न 3. तारापीडः कः आसीत्?

उत्तर– तारापीडः उज्जयिन्यां राज्ञः आसीत्।

प्रश्न 4. चन्द्रमा कस्य तनयं भविता?

उत्तर– चन्द्रमा राज्ञतारापीडस्य तनयं भविता।

प्रश्न 5. पुण्डरीकः कस्य तनयं भविता?

उत्तर– पुण्डरीकः शुकनासस्य तनयं भविता।

➥ **एतत् श्रुत्वा "हा देव पुण्डरीक! जन्मान्तरेऽपि अविस्मृतमदनुराग! लोकान्तरगतस्यापि ते अहमेव राक्षसी विनाशायोपजाता" इत्युन्मुक्तार्तनादा महाश्वेताम् कपिञ्जलः पुनरवादीत्–"गन्धर्वराजपुत्रि! कस्तवात्र दोष? यथा च शापदोषात् इदमुपनतम् भवत्योः द्वयोरपि दुःखम् तथा मया कथितमेव। चन्द्रमसोऽपि भारती भवतीभ्यां श्रुतैव। भवत्या अङ्गीकृतं तपः तदेव अनुबध्यताम्" इति।**

शब्दार्थ– जन्मान्तरे अपि = दूसरे जन्म में भी। अविस्मृतमदनुरागः = मेरे प्रेम को न भूलने वाले। लोकान्तरगतस्यापि = दूसरे लोक में जाने पर भी। विनाशायोपजाता = विनाश के लिए उत्पन्न हुई। उन्मुक्तार्तनादाम् = चिल्लाकर रोने वाली। कस्तवात्र = इसमें तुम्हारा कौन। शापदोषात् = शाप के दोष से। इदमुपनत् = यह हुआ है। भवत्योः द्वयोरपि = आप दोनों को। भारती = वाणी। भवतीभ्याम् = आप दोनों। अनुबध्यताम् = निर्वाह कीजिए।

हिन्दी अनुवाद– यह सुनकर, हा देव पुण्डरीक! दूसरे जन्म में भी मेरे प्रेम को न भूलने वाले, दूसरे लोक में चले जाने वाले, आपके विनाश के लिए ही मुझ राक्षसी का जन्म हुआ। इस प्रकार चिल्लाकर रोने वाली महाश्वेता से कपिंजल ने फिर कहा– गन्धर्वराजपुत्री, इसमें तुम्हारा दोष ही क्या है? शाप के कारण जिस प्रकार आप दोनों को यह दुःख मिला है उसे मैंने कहा है। चन्द्रमा की वाणी आप लोगों ने सुनी ही है। आपने जिस तप को स्वीकार किया है उसका निर्वाह कीजिए।

व्याकरणात्मक टिप्पणी– अविस्मृतमत् + अनुरागः। कस्तवात्र = कः + तव + अत्र। उन्मुक्तार्तनादाम् = उन्मुक्ते + आर्तनादाम्। द्वयोरपि = द्वयोः + अपि।

॥ प्रश्नोत्तरः ॥

प्रश्न 1. उपर्युक्त गद्यांश की पुस्तक और लेखक का नाम लिखिए।

उत्तर– प्रस्तुत गद्यांश की पुस्तक का नाम 'चन्द्रापीडकथा' और इसके लेखक 'बाणभट्ट' हैं।

प्रश्न 2. "जन्मान्तरेऽपि अविस्मृतमदनुराग! लोकान्तरगतस्यापि ते अहमेव राक्षसी विनाशायोपजाता।" रेखांकित अंश का अनुवाद कीजिए।

उत्तर– दूसरे जन्म में भी मेरे प्रेम को न भूलने वाले, दूसरे लोक में चले जाने वाले आप के विनाश के लिए ही मुझ राक्षसी का जन्म हुआ।

प्रश्न 3. "हा देव पुण्डरीक! जन्मान्तरेऽपि अविस्मृतमदनुराग!" कस्याः उक्तिः?

उत्तर– महाश्वेतायाः उक्तिः।

प्रश्न 4. कया अङ्गीकृतं तपः?

उत्तर– महाश्वेतया अङ्गीकृतं तपः।

प्रश्न 5. कस्य अनुबध्यताम्?

उत्तर– "भवत्या अङ्गीकृतं तपः तदेव अनुबध्यताम्।"

➥ **अथ कादम्बरी कपिञ्जलम् अप्राक्षीत्–''भगवन्! पत्रलेखया त्वया च अस्मिन् सरसि जलप्रवेशः कृतः। तत् किम् तस्याः संवृत्तम्? इत्यावेदनेन प्रसादं करोतु भवान्'' इति। स तु प्रत्यवादीत्–''राजपुत्रि! सलिलपातानन्तरम् न कश्चिदपि तद्वृत्तान्तः मया ज्ञातः। तत् अधुना क्व चन्द्रापीडस्य जन्म? क्व वैशम्पायनस्य? किं वास्याः पत्रलेखायाः वृत्तम्? सर्वस्यास्य वृत्तान्तस्य अवगमनाय भगवतः श्वेतकेतोः पादमूले गमिष्यामि'' इत्यभिदधान एव गगनम् उदपतत्।**

शब्दार्थ– अप्राक्षीत् = पूछा। जलप्रवेशः कृतः = जल में प्रवेश किया। तस्याः = उसका। संवृत्तम् = हुआ। आवेदनेन = बताकर। सलिलपातानन्तरम् = जल में प्रवेश करने के बाद। तद्वृत्तान्तः = उसका समाचार। अवगमनाय = जानने के लिए। इत्यभिदधानः एव = ऐसा कहते हुए। उदपतत् = उड़ गया।

हिन्दी अनुवाद– इसके बाद कादम्बरी ने कपिंजल से पूछा– भगवन्! पत्रलेखा और आपने इस तालाब के जल में प्रवेश किया। फिर उसका (पत्रलेखा का) क्या हुआ? यह मुझे बताने की कृपा करें। उसने उत्तर दिया– राजपुत्रि! जल में प्रवेश करने के बाद उसका कोई भी समाचार मैं न जान सका। इस समय चन्द्रापीड का जन्म कहाँ हुआ है? वैशम्पायन का जन्म कहाँ हुआ है? पत्रलेखा की क्या दशा है? इन सभी वृत्तान्तों को जानने के लिए मैं भगवान् श्वेतकेतु के पास जा रहा हूँ। ऐसा कहते हुए वह आकाश में उड़ गया।

व्याकरणात्मक टिप्पणी– सलिलपातानन्तरम् = सलिलपात् + अनन्तरम्। तद्वृत्तान्तः = तत् + वृत्तान्तः। इत्यभिदधानः = इति + अभिदधानः।

|| प्रश्नोत्तरः ||

प्रश्न 1. प्रस्तुत गद्यांशस्य पुस्तकं लेखकञ्च नाम लिखत।
उत्तर– प्रस्तुत गद्यांशस्य पुस्तकं नाम 'चन्द्रापीडकथा' अस्य लेखकः च 'बाणभट्टः' अस्ति।
प्रश्न 2. ''तत् अधुना क्व चन्द्रापीडस्य जन्म?'' रेखांकित अंश का अनुवाद कीजिए।
उत्तर– इस समय चन्द्रापीड का जन्म कहाँ हुआ है।
प्रश्न 3. कादम्बरी किम् अप्राक्षीत्?
उत्तर– कादम्बरी कपिञ्जलम् अप्राक्षीत्।
प्रश्न 4. कः भगवतः श्वेतकेतोः पादमूले जगाम?
उत्तर– कपिञ्जलः भगवतः श्वेतकेतोः पादमूले जगाम।
प्रश्न 5. कः गगनम् उदपतत्?
उत्तर– कपिञ्जलः गगनम् उदपतत्।

➥ **अथ कादम्बरी तां निर्विकारवदनाम् चन्द्रापीडतनुम् कस्मिंश्चित् शिलातले स्थापयित्वा स्नानशुचिः भूत्वा देवतोचिताम् अपचितिं संपाद्य, निराहारा दिवसम् अनयत्। यथैव दिवसम् तथैव मेघोपरोधभीमाम् क्षपामपि समुपविष्टैव क्षपितवती। अन्येद्युश्च महाश्वेतया उपनीतानि फलानि तया सहैव उपभुक्तवती। अथ च मदलेखाम् अवादीत्- ''प्रियसखि! देवस्य शरीरम् इदम् उपचरन्तीभिः अस्माभिः आशापक्षयात् अत्र स्थातव्यम्। तत् इमम् अत्यद्भुतं वृत्तान्तम् तातस्य अम्बायाश्च गत्वा निवेदय। यथा माम् एवंविधाम् आगत्य न पश्यतः तथा करिष्यसि''। इत्यभिधाय ताम् व्यसर्जयत्। गत्वा आगतया च तया, ''प्रियसखि! सिद्धं ते अभिवाञ्छितम्। एवं सन्दिष्टम् तातेन अम्बया च– शापावसाने जामात्रा सहैव आनन्दवाष्पनिर्भरम् आननम् ते द्रक्ष्यावः'' इति आवेदिते निर्वृतेन अन्तरात्मना अतिष्ठत्।**

अथ कादम्बरी .... गत्वा निवेदय। (2020 ZR)

शब्दार्थ– निर्विकारवदनाम् = शान्तमुखवाले। चन्द्रापीडतनुम् = चन्द्रापीड के शरीर को। स्थापयित्वा = रखकर। स्नानशुचिः = स्नान से पवित्र। देवोचिताम् = देवता के योग्य। अपचितिम् = पूजा। संपाद्य = करके। निराहारः = बिना भोजन के ही। अनयत् = बिताया। मेघोपरोधभीमाम् = बादलों के व्याप्त हो जाने से भयंकर। क्षपाम् = रात को। समुपविष्टैव = बैठी ही। क्षपितवती = बिता दिया। उपचरन्तीभिः = सेवा करती हुई। आशापक्षयात् = शाप के नष्ट होने तक। स्थातव्यम् = रहना चाहिए। अत्यद्भुतं वृत्तान्तम् = अति अद्भुत समाचार को। अम्बायाः = माता को। निवेदय = बताओ। एवम् विधाम् = इस प्रकार की। इत्यभिधाय = ऐसा कहकर।

व्यसर्जयत् = विदा किया। जामात्रा सहैव = दामाद के साथ ही। आनन्दवाष्पनिर्भरम् = आनन्द के आँसुओं से पूर्ण। आननम् ते = तुम्हारा मुख। द्रक्ष्यावः = देखेंगे। आवेदिते = ऐसा कहने पर। निर्वृतेन अन्तरात्मना = निश्चिन्त हृदय से। अतिष्ठित् = रहने लगी।

हिन्दी अनुवाद– इसके पश्चात् कादम्बरी ने शान्त मुखवाले चन्द्रापीड के शरीर को किसी शिला पर रखकर स्नान से पवित्र हो देवोचित पूजा करके बिना कुछ खाये-पीये उस दिन को बिता दिया और जिस प्रकार दिन बिताया उसी प्रकार बादलों के घिर आने से भयंकर रात को भी बैठे ही बैठे बिता दिया। दूसरे दिन महाश्वेता द्वारा लाये गये फलों को उसी के साथ खाया। इसके बाद मदलेखा से कहा– देव चन्द्रापीड के शरीर की सेवा करती हुई हम लोगों को शाप का अन्त होने के समय तक यहाँ रहना चाहिए। इसलिए इस अद्भुत वृत्तान्त को तुम पिता और माता के पास जाकर बतला दो और ऐसा प्रयत्न करो कि वह लोग मुझे यहाँ आकर इस स्थिति में न देखें। ऐसा कहकर उसे भेज दिया। वहाँ जाकर लौटने के पश्चात् मदलेखा ने कहा कि प्रिय सखि, तुम्हारा मनोरथ सफल हुआ। पिता ने यह सन्देश दिया है कि शाप के अन्त में दामाद के साथ आनन्दाश्रुपूर्ण तुम्हारे मुख को देखेंगे। उसके ऐसा कहने पर कादम्बरी निश्चिन्त मन से वहाँ रहने लगी।

व्याकरणात्मक टिप्पणी– निर्विकारवदनाम् = निर्विकारं वदनम् यस्याः ताम्। स्नानशुचिः = स्नानेन शुचिः। मेघोपरोधभीमाम् = मेघानाम् उपरोधेन भीमा ताम्। अत्यद्भुतं = अति + अद्भुतं। इत्यभिधाय = इति + अभिधाय।

॥ प्रश्नोत्तरः ॥

प्रश्न 1. उपर्युक्त गद्यांश की पुस्तक और लेखक का नाम लिखिए।

उत्तर– प्रस्तुत गद्यांश की पुस्तक का नाम 'चन्द्रापीडकथा' और इसके लेखक 'बाणभट्ट' हैं।

प्रश्न 2. उपर्युक्त गद्यांश किस मूल ग्रन्थ से उद्धृत है?

उत्तर– प्रस्तुत गद्यांश बाणभट्ट कृत कादम्बरी कथा से उद्धृत है।

प्रश्न 3. 'प्रियसखि! देवस्य शरीरम् इदम् उपचरन्तीभिः अस्माभिः आशापक्षयात् अत्र स्थातव्यम्।' रेखांकित अंश का अनुवाद कीजिए।

उत्तर– प्रियसखि! देव के शरीर की सेवा करती हुई हम लोगों को शाप के अन्त होने के समय तक यहाँ रहना चाहिए।

प्रश्न 4. कादम्बरी चन्द्रापीडतनुं कुत्र स्थापितवती?

उत्तर– कादम्बरी चन्द्रापीडतनुं कस्मिंश्चित् शिलातले स्थापितवती।

प्रश्न 5. कादम्बरी कथं दिवसम् अनयत्?

उत्तर– कादम्बरी निराहार दिवसम् अनयत्।

प्रश्न 6. कादम्बरी अन्येद्युः कया उपनीतानि फलानि उपभुक्तवती?

उत्तर– कादम्बरी अन्येद्युः महाश्वेतया उपनीतानि फलानि उपभुक्तवती।

➡ **अत्रान्तरे चन्द्रापीडः चिरयति इति उत्ताम्यता तारापीडेन वार्ताहराः प्रहिताः। ते च कादम्बरीतुखात् सर्वं वृत्तान्तम् अधिगम्य प्रतिनिवृत्य तारापीडाय राज्ञे यथादृष्टं यथाश्रुतं च सर्वम् निवेदयामासुः। श्रुत्वा च विस्मयेन कुतूहलेन शोकेन चाविष्टम् तारापीडं शुकनासः प्रोवाच– "देव! विचित्रेऽस्मिन् संसारे किं किं संभाव्यते। सर्वम् आगमप्रामाण्यात् अभ्युपगतमेव। मुद्राबन्धनात् ध्यानाद्वा विषप्रसुप्तस्य उत्थापनम्। अयस्कान्तस्य चायस्समाकर्षणम्। वैदिकैः अवदिकैर्वा मन्त्रैः कर्मसु सिद्धिः। आगमेषु च पुराणरामायणभारतादिषु बहुप्रकाराः शापवार्ताः श्रूयन्ते। तद्यथा-नहुषस्य राजर्षेः अगस्त्यशापात् अजगरता सौदासस्य वसिष्ठसुतशापात् मानुषादत्वम्। ययातेः असुरगुरुशापात् तारुण्य एव जरसा भङ्गः। त्रिशंकोः पितृशापात् चाण्डालभाव इति।**

शब्दार्थ– अत्रान्तरे = इसी बीच। चिरयति = विलम्ब करता है। उत्ताम्यता = संतप्त हृदय वाले। वार्ताहराः = समाचार ले जाने वाले। प्रहिताः = भेजे। कादम्बरीमुखात् = कादम्बरी के मुँह से। अधिगम्य = जानकर। प्रतिनिवृत्य = लौटकर। यथादृष्टन् = जैसा देखा। यथाश्रुतम् = जैसा सुना। निवेदयामासुः = निवेदन किये। आविष्टम् = पूर्ण होकर। संभाव्यते = हो सकता है। आगमप्रमाणात् = शास्त्रों के प्रमाण से। अभ्युपगतमेव = स्वीकृत है / मानी गई है। मुद्राबन्धात् ध्यानाद्वा = ध्यान व पूजा की मुद्राओं से। विषप्रसुप्तस्य = विष से सोये हुए। उत्थापनम् = उठाना, जगाना। अयस्कान्तस्य = चुम्बक लोहा। अयस्समाकर्षणम् = लोहे का खींचना। अवैदिकैः = लौकिक। कर्मसु = कर्मों में। श्रूयन्ते = सुनी जाती हैं। अजगरता = अजगर बनना। मानुषादत्वम् = मनुष्य का भोजन करने वाला (नर-भक्षी)। असुरगुरुशापात् = शुक्र के शाप से। तारुण्ये एव = जवानी में ही। जरसा भंगः = बुढ़ापा से बूढ़ा होना। चाण्डालभावः = चाण्डाल बनना।

हिन्दी अनुवाद– इसी बीच चन्द्रापीड को अधिक देर करने पर दुःखी होकर तारापीड ने उसके पास सन्देशवाहकों को भेजा। उन्होंने कादम्बरी के मुख से सारी बातें जानकर लौट करके राजा तारापीड को सुनायी। यह सुनकर आश्चर्य और कुतूहल तथा शोक से पूर्ण राजा तारापीड से मंत्री शुकनास ने कहा– राजन्, इस विचित्र संसार में क्या-क्या नहीं हो सकता? शास्त्रों के प्रमाण के अनुसार सभी कुछ हुआ है। मुद्राओं तथा ध्यान द्वारा विष से अचेत होश में आये हैं। वैदिक या लौकिक मन्त्रों से कार्य की सिद्धि हुई है। वेदों, पुराणों, रामायण, महाभारत आदि में बहुत प्रकार के शाप की कथायें सुनी जाती हैं। जैसे अगस्त्य के शाप से राजा नहुष का अजगर बनना, वशिष्ठपुत्र के शाप से सौदास का नरभक्षी होना, शुक्र के शाप से ययाति का जवानी में ही बुढ़ापे से टेढ़ा होना, पिता के शाप से त्रिशंकु का चांडाल बनना आदि।

व्याकरणात्मक टिप्पणी– अत्रान्तरे = अत्र + अन्तरे। अभ्युपगतमेव = अभि + उपगतम् + एव। अयस्समाकर्षणम् = अयस् + समाकर्षणम्।

॥ प्रश्नोत्तरः ॥

प्रश्न 1. प्रस्तुत गद्यांशस्य पुस्तकं लेखकञ्च नाम लिखत।

उत्तर– प्रस्तुत गद्यांशस्य पुस्तकं नाम 'चन्द्रापीडकथा' अस्य लेखकः च 'बाणभट्टः' अस्ति।

प्रश्न 2. ''देव! विचित्रेऽस्मिन् संसारे किं किं संभाव्यते।'' रेखांकित अंश का अनुवाद कीजिए।

उत्तर– महाराज! इस विचित्र संसार में क्या-क्या नहीं हो सकता है?

प्रश्न 3. उत्ताम्यता तारापीडेन कस्याः समीपे वार्ताहराः प्रतिहताः?

उत्तर– चन्द्रापीडस्य समीपे वार्ताहराः प्रतिहताः।

प्रश्न 4. सर्वहराः कस्याः मुखात् सर्वं वृत्तान्तं ज्ञातः?

उत्तर– सर्वहराः कादम्बरीमुखात् सर्वं वृत्तान्तं ज्ञातः।

प्रश्न 5. शुकनासः किं प्रोवाच?

उत्तर– शुकनासः प्रोवाच–''देव! विचित्रेऽस्मिन् संसारे किं किं संभाव्यते।''

➥ **श्रूयते च स्वर्गलोकनिवासी महाभिषः भूमौ शान्तनुः उत्पन्नः गङ्गायाम् वसूनाम् अष्टानाम् उत्पत्तिः। तिष्ठन्तु तावदन्ये। अयमादिदेवः भगवान् अज एव जमदग्नेः आत्मजाताम् उपगतः, पुनश्चतुर्धा आत्मानं विभज्य राजर्षेः दशरथस्य तथैव मथुरायां वसुदेवस्य। तन्मनुष्येषु देवानाम् उत्पत्तिः नैवासंभाविनी। अपि च, गर्भारम्भसंभवे देव्या वदने विशन् चन्द्रमा एव दृष्टः। तथा ममापि स्वप्ने पुण्डरीकस्य दर्शनम् समुपजातम्। विनष्टयोः तयोः कथं पुनः जीवितप्रतिलम्भः इत्यत्रापि अमृतमेव कारणम् आवेदितम्। तच्च चन्द्रमसि विद्यते। तत् अस्मिन् वस्तुनि न मनागपि शोकः कार्यः'' इत्युक्तवति शुकनाशे सशोक एव राजा सद्य एव गमनसंविधानम् अकरायत्।**

(2019 CZ)

शब्दार्थ– महाभिषः = महाभिष नाम का राजा। वसूनाम् अष्टानाम् = आठ वसुओं का। तिष्ठन्तु तावदन्ये = दूसरों की बात छोड़िये। अयमादिदेवः = यह आदि देवता। अज = ब्रह्मा। आत्मजताम् उपगतः = पुत्र रूप में उत्पन्न हुए। चतुर्धा = चार भाग में। विभज्य = बाँटकर। नैवासंभाविनी = असम्भव नहीं है। देव्याः वदने = देवी के मुख में। विशन् = प्रवेश करते हुए। पुण्डरीकस्य = श्वेतकमल का। समुपजातम् = हुआ। जीवितप्रतिलम्भः = पुनः जीवित होना। आवेदितम् = बताया गया है। चन्द्रमसि = चन्द्रमा में। मनागपि = थोड़ी भी। वस्तुनि = विषय में। उक्तवति = कहने पर। सद्यः = शीघ्र ही। संविधानम् = जाने की तैयारी। अकारयत् = कराया।

हिन्दी अनुवाद– ऐसा सुना जाता है कि स्वर्गवासी महाभिष नाम के राजा पृथ्वी पर शान्तनु हुए थे। उन्हीं द्वारा गंगा से आठ वसुओं का जन्म हुआ था। दूसरों की बात छोड़िए, यह आदि देवता ब्रह्मा भी जमदग्नि के पुत्र बने थे। इसी प्रकार अपने को चार भागों में बाँटकर दशरथ के पुत्र तथा मथुरा में वसुदेव के पुत्र हुए थे। अतः मनुष्यों में देवताओं की उत्पत्ति असम्भव नहीं है। इसके अतिरिक्त गर्भ के आरम्भ के समय आपने देवी के मुख में चन्द्रमा को प्रवेश करते हुए देखा था और मैंने स्वप्न में पुण्डरीक का दर्शन किया था। नष्ट हुए उन दोनों को फिर से जीवन मिलने का कारण अमृत बताया गया है, वह चन्द्रमा विद्यमान है। इसलिए इस विषय में आप कुछ भी शोक न करें। शुकनास के ऐसा कहने पर शोक के साथ राजा शीघ्र ही प्रस्थान की तैयारी करने लगा।

व्याकरणात्मक टिप्पणी– तावदन्ये = तावत् + अन्ये। अयमादिदेवः = अयम् + आदिदेवः। नैवासंभाविनी = न + एव + संभाविनी।

|| प्रश्नोत्तरः ||

प्रश्न 1. उपर्युक्त गद्यांश की पुस्तक और लेखक का नाम लिखिए।
उत्तर– प्रस्तुत गद्यांश की पुस्तक का नाम 'चन्द्रापीडकथा' और इसके लेखक 'बाणभट्ट' हैं।
प्रश्न 2. 'तन्मनुष्येषु देवानाम् उत्पत्तिः नैवासंभाविनी।' रेखांकित अंश का अनुवाद कीजिए।
उत्तर– मनुष्यों में देवताओं का उत्पन्न होना असम्भव नहीं है।
प्रश्न 3. कस्य नाम्नः राज्ञः भूमौ शान्तनुः उत्पन्नः?
उत्तर– स्वर्गलोकनिवासी महाभिषः नाम्नः राज्ञः भूमौ शान्तनुः उत्पन्नः।
प्रश्न 4. कः जमदग्नेः आत्मजातम् उपगतः?
उत्तर– आदिदेव भगवान अज जमदग्नेः आत्मजातम् उपगतः।
प्रश्न 5. कस्याम् अष्टानाम् वसुनाम् उत्पत्तिः?
उत्तर– गङ्गायाम् अष्टानाम् वसुनाम् उत्पत्तिः।
प्रश्न 6. गर्भारम्भसंभवे कया वदने विशन् चन्द्रमा एव दृष्टः?
उत्तर– गर्भारम्भसंभवे देव्या वदने विशन् चन्द्रमा एव दृष्टः।
प्रश्न 7. कः स्वप्ने पुण्डरीकस्य दर्शनम् उपजातम्?
उत्तर– शुकनासः स्वप्ने पुण्डरीकस्य दर्शनम् उपजातम्।

➥ **अथ उत्ताम्यता हृदयेन राजा सततम् अविच्छिन्नैः प्रयाणकैः आससाद महाश्वेताश्रमम् । अथ सहसैव तत् चन्द्रापीडगुरुजनागमनम् आकर्ण्य, धावित्वा ह्रिया महाश्वेता गुहाभ्यन्तरमविशत्। चित्ररथतनयापि लज्जावनम्रमुखी प्रतिपत्तिमूढा परवत्येव मदलेखया यथाक्रमम् अकारयत वन्दनं गुरूणाम्। नरपतिस्तु अनतिक्रमणीया नियतिरिति कृत्वा संनिहितान्यपि परित्यज्य सर्वसुखानि तपस्विजनोचिताः क्रियाः कुर्वन् सपरिवारः समं देव्या शुकनासेन च तत्रैव अतिष्ठत्।**

शब्दार्थ– उत्ताम्यता हृदयेन = सन्तप्त हृदय से। सततम् = निरन्तर। अविच्छिनैः प्रयाणकैः = लगातार प्रस्थानों से। महाश्वेताश्रमम् = महाश्वेता के आश्रम को। आससाद = पहुँचा। चन्द्रापीडगुरुजनागमनम् = चन्द्रापीड के गुरुजनों का आगमन। आकर्ण्य = सुनकर। धावित्वा = दौड़कर। हिया = लज्जा से। गुहाभ्यन्तरम् = गुफा के बीच। चित्ररथतनयापि = चित्ररथ की पुत्री कादम्बरी भी। लज्जावनम्रमुखी = लज्जा से सिर झुकाकर। प्रतिपत्तिमूढ़ा = कर्त्तव्यज्ञान से रहित। परवत्येव = पराधीन-सी। मदलेखया = मदलेखा द्वारा। अकारयत = कराया। अनतिक्रमणीया = अनुल्लंघनीय। नियतिः = भाग्य। सन्निहितान्यपि = समीप में ही उपस्थित। सर्वसुखानि = सारे सुख को। तपस्विजनोचिताः = तपस्वी लोगों के योग्य। क्रियाः कुर्वन् = कार्य करते हुए। समम् देव्या = देवी के साथ।

हिन्दी अनुवाद– इसके पश्चात् दुःखी हृदय से राजा निरन्तर बिना विश्राम के चलते हुए महाश्वेता के आश्रम में पहुँचे। अकस्मात् चन्द्रापीड के गुरुजनों (माता-पिता) का आना सुनकर महाश्वेता लज्जा के कारण दौड़कर गुफा के भीतर चली गई। कादम्बरी ने भी लज्जा से सिर झुकाकर तत्कालोचित कर्त्तव्यज्ञान से रहित पराधीन-सी होकर मदलेखा द्वारा क्रमशः गुरुजनों की वन्दना कराई। भाग्य को अनुल्लंघनीय जानकर राजा भी सभी सुलभ सुखों को छोड़कर तपस्वियों के योग्य क्रियायें करते हुए सपरिवार देवी विलासवती तथा शुकनास के साथ वहीं रहने लगे।

व्याकरणात्मक टिप्पणी– चन्द्रापीडगुरुजनागमनम् = चन्द्रापीडस्य गुरुजनानाम् आगमनम्। गुहाभ्यन्तरम् = गुहा + अभि + अन्तरम्। चित्ररथतनयापि = चित्ररथस्य + तनया + अपि। परवत्येव = परवत्य + एव।

|| प्रश्नोत्तरः ||

प्रश्न 1. प्रस्तुत गद्यांशस्य पुस्तकं लेखकञ्च नाम लिखत।
उत्तर– प्रस्तुत गद्यांशस्य पुस्तकं नाम 'चन्द्रापीडकथा' अस्य लेखकः च 'बाणभट्टः' अस्ति।
प्रश्न 2. ''अथ उत्ताम्यता हृदयेन राजा सततम् अविच्छिन्नैः प्रयाणकैः आससाद महाश्वेताश्रमम्।'' रेखांकित अंश का अनुवाद कीजिए।
उत्तर– इसके पश्चात् दुःखी हृदय से राजा निरन्तर विश्राम रहित यात्रा से महाश्वेता के आश्रम में पहुँचे।

प्रश्न 3. राजा तारापीडः कुत्र आससाद?

उत्तर– राजा तारापीडः महाश्वेताश्रमम् आससाद।

प्रश्न 4. के चन्द्रापीडगुरुजनागमनम् अशृणोत्?

उत्तर– महाश्वेता चन्द्रापीडगुरुजनागमनम् अशृणोत्।

प्रश्न 5. का धावित्वा ह्रिया गुहाभ्यान्तरमविशत्?

उत्तर– महाश्वेता धावित्वा ह्रिया गुहाभ्यन्तरमविशत्।

➥ **एवं कथयित्वा भगवान जाबालिः स्मितं कृत्वा हारीतप्रमुखान् सर्वान् अवादीत् ''दृष्टं कथारसस्य चित्ताक्षेपसामर्थ्यम्। यत् कथयितुं प्रवृत्तोऽस्मि तत् परित्यज्यैव कथारसात् अतिदूरम् अतिक्रान्तोऽस्मि। यः स कामोपहतचेताः स्वयं कृतादेव अविनयात् दिव्यलोकतः परिभ्रश्य, मर्त्यलोके वैशम्पायननामा शुकनाससूनुः अभवत्, स एवैष पुनः स्वयंकृतेन अविनयेन अस्यां शुकजातौ पतितः'' इति। एवं वदत्येव भगवति जाबालौ सुप्तप्रबुद्धस्येव मे पूर्वजन्मोपार्जिताः सर्वाः विद्याः जिह्वाग्रे अभवन्। मनुजस्येव चेयं विस्पष्टा भारती समुत्पन्ना। मनुष्यशरीरात् ऋते सर्वमन्यत् महाश्वेतानुरागादिकम् उपगतम्। अथ भगवान् जाबालिः ''अहो प्रभातप्राया रजनी'' इत्युक्त्वा गोष्ठीं भङ्क्त्वा उदतिष्ठत्।** (2017 NG)

शब्दार्थ– स्मितं कृत्वा = मुसकराकर। अवादीत् = कहा। कथारसस्य = कथा से रस के। चित्ताक्षेपसामर्थ्यम् = मन को खींच लेने की शक्ति। दृष्टम् = देखा। यत् कथयितुम् = जो कहने के लिए। प्रवृत्तोऽस्मि = लगा हुआ हूँ। अतिक्रान्तोऽस्मि = चला आया हूँ। कामोपहतचेताः = काम से नष्ट ज्ञान वाला। कृतादेव = किये हुए। अविनयात् = पाप से। दिव्यलोकतः = देवता के लोक से। परिभ्रश्य = भ्रष्ट होकर। शुकनाससूनुः = शुकनास का पुत्र। शुकजातौ = सुग्गे की योनि में। एवं वदत्येव = ऐसा कहते ही। सुप्तप्रबुद्धस्येव = सोकर जगे हुए के समान। पूर्वजन्मोपार्जिताः = पूर्व जन्म में प्राप्त की गई। जिह्वाग्रे अभवन् = याद हो गयी। मनुजस्येव = मनुष्य के समान। विस्पष्टा भारती = स्पष्ट वाणी। मनुष्यशरीरात् ऋते = मानव शरीर छोड़कर। सर्वमन्यत् = और सब। उपगतम् = याद हो गई। गोष्ठी भङ्क्त्वा = गोष्ठी भंग करके। उदतिष्ठत् = उठे।

हिन्दी अनुवाद– इस प्रकार कहकर भगवान् जाबालि ने मुसकराकर हारीत इत्यादि सभी श्रोताओं से कहा– मन को हरण कर लेने वाली कथा के रस की शक्ति आप लोगों ने देख ली। मैं जो कह रहा था उसे छोड़कर कथारस में बहुत दूर तक चला गया हूँ। कामवासना से नष्टज्ञान वह अपने ही किये पापों के कारण स्वर्गलोक से भ्रष्ट होकर मृत्युलोक में शुकनास का पुत्र वैशम्पायन हुआ था और वही फिर अपने ही पापों से इस सुग्गे की योनि में आया है। भगवान् जाबालि के ऐसा कहते ही सोकर जगे हुए के समान मेरे पूर्वजन्म की सारी विद्यायें याद हो गयीं। मनुष्य के समान यह चेष्टा और वाणी भी उत्पन्न हो गई। मनुष्य शरीर को छोड़कर महाश्वेता का अनुराग आदि सब प्राप्त हो गया। अरे प्रातःकाल हो गया। ऐसा कहकर गोष्ठी भंग करके भगवान् जाबालि उठ खड़े हुए।

व्याकरणात्मक टिप्पणी– कृत्वा = कृ + क्त्वा। प्रवृत्तोऽस्मि् = प्रवृत्तः + अस्मि। कामोपहतचेताः = कामेन उपहतः चेतः यस्य सः। वदत्येव = वदति + एव। जिह्वाग्रे = जिह्वा + अग्रे। मनुजस्येव = मनुजस्य + एव।

|| प्रश्नोत्तरः ||

प्रश्न 1. उपर्युक्त गद्यांश की पुस्तक और लेखक का नाम लिखिए।

उत्तर– प्रस्तुत गद्यांश की पुस्तक का नाम 'चन्द्रापीडकथा' और इसके लेखक 'बाणभट्ट' हैं।

प्रश्न 2. ''मनुजस्येव चेयं विस्पष्टा भारती समुत्पन्ना।'' रेखांकित अंश का अनुवाद कीजिए।

उत्तर– मनुष्य की तरह ही विशेष रूप से स्पष्ट वाणी भी उत्पन्न हो गई।

प्रश्न 3. हारीतः कः आसीत्?

उत्तर– हारीतः जाबालि मुनेः पुत्रः आसीत्।

प्रश्न 4. मर्त्यलोके शुकनासस्य पुत्रः कः अभवत्?

उत्तर– मर्त्यलोके शुकनासस्य पुत्रः वैशम्पायनः अभवत्।

प्रश्न 5. कः स्वयंकृते अविनयेन शुकजातौ पतितः?

उत्तर– वैशम्पायनः स्वयंकृते अविनयेन शुकजातौ पतितः।

➥ **उत्थिते जाबालौ समस्तैव सा परिषत् यथास्थानं जगाम। हारीतस्तु माम् आत्मपर्णशालां नीत्वा स्वशयनीयैकदेशे स्थापयित्वा प्रभातिकक्रियाकरणाय निर्ययौ। अथ कपिञ्जलः मम पितुः श्वेतकेतोः पादमूलात् आगत्य हारीतेन प्रवेशितः करद्वयेन उत्क्षिप्य माम् भूयसा मन्युवेगेन अरोदीत्। अहं तु तम् अवदम्– ''सखे कपिञ्जल! धन्योऽसि बालोऽपि त्वं न स्पृष्ट एव अमीभिः संसारदोषैः। उपविश्य तावत् कथय यथावृत्तम्। अपि कुशलं तातस्य। मद्वृत्तान्तम् आकर्ण्य किमुक्तवान्? कुपितो वा न वा'' इति। स त्वेवम् आख्यातवान्–सखे! कुशलं तातस्य, अयं च अस्मद्वृत्तान्तः प्रथमतरमेव तातेन दिव्येन चक्षुषा दृष्टः। दृष्ट्वा च प्रतिक्रियायै कर्म प्रारब्धम्।**

शब्दार्थ– उत्थिते = उठने पर। समस्तैव = सारी। सा परिषत् = वह सभा। जगाम = चली गई। आत्मपर्णशालाम् = अपनी झोपड़ी में। नीत्वा = ले जाकर। स्वशयनीयैकदेशे = अपने सोने की जगह के एक किनारे। प्राभातिक = प्रातःकाल की। करणाय = करने के लिए। निर्ययौ = चले गये। पादमूलात् = चरणों के पास से। आगत्य = आकर। उत्क्षिप्य = उठाकर। भूयसा = अत्यधिक। मन्युवेगेन = दुःख के वेग से। अरोदीत् = रोया। अमीभिः = इन। संसारदोषैः = सांसारिक वासनाओं से। उपविश्य = बैठकर। यथावृत्तम् = जो हुआ। आख्यातवान् = कहा। अस्मद्वृत्तान्तः = हम लोगों का समाचार। प्रथमतरमेव = पहले ही। तातेन = पिता द्वारा। चक्षुषा = नेत्रों द्वारा। प्रतिक्रियायै = उसकी शान्ति के उपाय के लिए। प्रारब्धम् = प्रारम्भ किया।

हिन्दी अनुवाद– जाबालि के उठ जाने पर सारी सभा यथास्थान चली गई। हारीत मुझे अपनी कुटिया में लाकर अपने बिछौने के एक किनारे रखकर प्रातःकालीन क्रियाओं को करने के लिए चले गये। इसके बाद कपिंजल ने मेरे पिता श्वेतकेतु के पास से लौटकर हारीत के साथ कुटिया में आकर दोनों हाथों से मुझे उठा लिया और वह अत्यन्त दुःख के साथ रोने लगा। मैंने उससे कहा– मित्र कपिंजल, तुम धन्य हो, बचपन से ही तुम इन सांसारिक वासनाओं से अछूते रहे हो, बैठकर सारा समाचार सुनाओ, पिता कुशल से हैं न? मेरा समाचार सुनकर उन्होंने क्या कहा? क्रुद्ध हुए अथवा नहीं? उसने मुझसे इस प्रकार कहा–पिताजी कुशल से हैं। पिताजी ने दिव्य दृष्टि से इस समाचार को पहले ही जान लिया था और उसी के लिए कार्य भी आरम्भ कर दिया था।

व्याकरणात्मक टिप्पणी– समस्तैव = समस्ते + एव। स्वशयनीयैकदेशे = स्वशयनीये + एकदेशे। अस्मद्वृत्तान्तः = अस्मत् + वृत्तान्तः। प्रथमतरमेव = प्रथमतरम् + एव।

‖ प्रश्नोत्तरः ‖

प्रश्न 1. प्रस्तुत गद्यांशस्य पुस्तकं लेखकञ्च नाम लिखत।

उत्तर– प्रस्तुत गद्यांशस्य पुस्तकं नाम 'चन्द्रापीडकथा' अस्य लेखकः च 'बाणभट्टः' अस्ति।

प्रश्न 2. '<u>धन्योऽसि बालोऽपि त्वं न स्पृष्ट एव अमीभिः संसारदोषैः।</u>' रेखांकित अंश का अनुवाद कीजिए।

उत्तर– तुम धन्य हो, बालक होकर भी तुम इन सांसारिक दोषों से अछूते हो।

प्रश्न 3. उत्थिते जाबालौ समस्तैव सा परिषत् कुत्र जगाम?

उत्तर– उत्थिते जाबालौ समस्तैव सा परिषत् यथास्थं जगाम।

प्रश्न 4. हारीतः शुकं कुत्र अनैषीत्?

उत्तर– हारीतः शुकं पर्णशालाम् अनैषीत्।

प्रश्न 5. श्वेतकेतुः कः आसीत्?

उत्तर– श्वेतकेतुः वैशम्पायनस्य पिता आसीत्।

प्रश्न 6. कपिञ्जलः कुतः प्रत्यागत्?

उत्तर– कपिञ्जलः मम पितुः श्वेतकेतोः पादमूलात् प्रत्यागत्।

➥ **समारब्धे एव कर्मणि तुरगभावात् विमुक्तः गतोऽस्मि तस्य पादमूलम्। गत्वा च भयात् अनपसर्पन्तं माम् आहूय आज्ञापितवान्– 'वत्स कपिञ्जल! परित्यज्यतां स्वदोषशङ्का। बलवती हि भवितव्यता। शुकजातौ इदानीं सुहृत् ते पतितः। तत् गत्वापि तम् अद्य नैवं वेत्सि। नाप्यसौ त्वां वेत्ति। मया तु वत्सस्य कृते समारब्धम् आयुष्करं कर्म। अधुना सिद्धप्रायमेवेदम्। तत् अत्रैव तावत् स्थीयताम्' इति। अद्य च प्रातरेव आहूय माम् आज्ञापितवान्– ''वत्स कपिञ्जल! महामुनेः जाबालेः आश्रमं सुहृत् ते प्राप्तः। जन्मान्तरस्मरणं चास्योपजातम्। तत् गच्छ संप्रति तं द्रष्टुम्। मदीयया च आशिषा अनुगृह्य वक्तव्योऽसौ–'वत्स! यावदिदं कर्म परिसमाप्यते तावत् त्वया अस्मिन्नेव**

जाबालेराश्रमे स्थातव्यम्' इति। इत्युक्त्वा कपिञ्जलः क्षणमिव स्थित्वा 'सखे व्रजामि' इत्युक्त्वा अन्तरिक्षम् अतिक्रम्य क्वापि अदर्शनम् अगात्।

शब्दार्थ– तुरगभावात् = घोड़े की योनि से। अनपसर्पन्तम् = पास न जाने वाले। आहूय = बुलाकर। आज्ञापितवान् = आज्ञा दी। परित्यज्यताम् = छोड़ो। भवितव्यता = होनहार। शुकजातौ = सुग्गे की योनि में। इदानीम् = इस समय। जन्मान्तरस्मरणम् = दूसरे जन्म की याद। सम्प्रति = इस समय। मदीयया = मेरे। आशिषा = आशीर्वाद द्वारा। परिसमाप्यते = समाप्त होता है। अन्तरिक्षम् = आकाश को। अतिक्रम्य = लांघकर। क्वापि = कहीं। अदर्शनम् अगात् = लुप्त हो गया।

हिन्दी अनुवाद– कार्य के आरम्भ होने पर मैं घोड़े की योनि से मुक्त होकर उनके चरणों में पहुँचा था। मैं वहाँ जाकर मारे डर के उनके पास नहीं जा रहा था, फिर भी उन्होंने मुझे बुलाकर कहा– पुत्र कपिंजल! अपने अपराध की शंका छोड़ दो। होनहार बलवान है। इस समय तुम्हारा मित्र सुग्गे की योनि में पड़ा है। इसलिए तुम आज जानकर भी उसे न जान सकोगे। न वह तुम्हें जान सकेगा। मैंने पुत्र के जीवन के लिए कर्म आरंभ किया है। अब वह सिद्ध होने के निकट है। इसीलिए तब तक यहीं ठहरो। आज प्रातःकाल ही उन्होंने मुझे बुलाकर कहा कि पुत्र कपिंजल! महामुनि जाबालि के आश्रम में तुम्हारा मित्र है। उसे अब देखने जाओ और मेरा आशीर्वाद कहकर उससे कहना कि जब तक यह कर्म समाप्त नहीं हो जाता तब तक वह उसी जाबालि के आश्रम में ही रहे। ऐसा कहकर कपिंजल थोड़ी देर तक रुका और मित्र मैं जा रहा हूँ ऐसा कहकर आकाश में लुप्त हो गया।

व्याकरणात्मक टिप्पणी– गतोऽस्मि = गतः + अस्मि। गत्वापि = गत्वा + अपि। नाप्यसौ = न + अपि + असौ। अत्रैव = अत्र + एव। चास्योपजातम् = च + अस्य + उपजातम्। यावदिदं = यावत् + इदं। अस्मिन्नेव = अस्मिन् + एव। इत्युक्त्वा = इति + उक्त्वा।

॥ प्रश्नोत्तरः ॥

प्रश्न 1. उपर्युक्त गद्यांश की पुस्तक और लेखक का नाम लिखिए।
उत्तर प्रस्तुत गद्यांश की पुस्तक का नाम 'चन्द्रापीडकथा' और इसके लेखक 'बाणभट्ट' हैं।

प्रश्न 2. 'बलवती हि भवितव्यता।' रेखांकित अंश का अनुवाद कीजिए।
उत्तर– होनहार निश्चय ही बलवान है।

प्रश्न 3. कः तुरगभावात् विमुक्तं बभूव?
उत्तर– कपिञ्जलः तुरगभावात् विमुक्तं बभूव।

प्रश्न 4. कपिञ्जलः तुरगभावात् विमुक्तः कस्य पादमूलम् अगमत्?
उत्तर– कपिञ्जलः तुरगभावात् विमुक्तः श्वेतकेतोः पादमूलम् अगमत्।

प्रश्न 5. 'बलवती हि भवितव्यता' इति कस्योक्तिः?
उत्तर– 'बलवती हि भवितव्यता' इति श्वेतकेतोः उक्तिः।

➥ **गते च तस्मिन्, हारीतेन प्रतिदिनम् आहारादिभिः उपचारैः संवर्ध्यमानः संजातपक्षोऽभवम् उत्पन्नोत्पतनसामर्थ्यश्च 'गमनक्षमस्तु संवृत्तोस्मि। नास्ति चन्द्रापीडोत्पत्तिपरिज्ञानम्। महाश्वेता पुनः सैवास्ते। भवतु, तत्रैव गत्वा तिष्ठामि' इति निश्चित्य एकदा प्रातर्विहारनिग्रत एव उत्तरां ककुभं गृहीत्वा अवहम्। अनभ्यस्तगमनतया स्तोकमेव गत्वा शिथिलितपक्षतिः कस्यचित् सरस्तीरतरुनिकुञ्जस्योपरि आत्मानम् अमुञ्चम्। ततश्च अध्वश्रमसुलभविनिद्राम् अगच्छम्। चिरादिव लब्धप्रबोधः बद्धम् आत्मानम् अपश्यम्। अग्रतश्च कालपुरुषमिव परुषं पुरुषम् अद्राक्षम्। आलोक्य च तम् आत्मनः उपरि निष्प्रत्याश एव अपृच्छम्– ''भद्र! कस्त्वम्? किमर्थं वा त्वया बद्धोऽस्मि?'' इति।**

शब्दार्थ– गते च तस्मिन् = उसके चले जाने पर। आहारादिभिः = भोजन आदि से। उपचारैः = सेवा से। संवर्ध्यमानः = बड़ा होकर। संजातपक्षः = पंखोंवाला। अभवम् = हुआ। उत्पन्नोत्पतनसामर्थ्यश्च = उड़ने योग्य। गमनक्षमः = जाने में समर्थ। चन्द्रापीडोत्पत्तिपरिज्ञानम् = चन्द्रापीड के उत्पन्न होने का ज्ञान। प्रातर्विहारनिर्गतः एव = प्रातःकाल विहार के लिए निकलकर। उत्तरां ककुभम् = उत्तर दिशा। अनभ्यस्तगमनतया = चलने का अभ्यास न होने के कारण। स्तोकमेव = थोड़ा ही। शिथिलितपक्षतिः = पंखों के शिथिल होने से। सरस्तीरतरुनिकुंजस्योपरि = तालाब के वृक्ष के कुंज के ऊपर। अमुञ्चम् = छोड़ दिया। अध्वश्रमसुलभविनिद्राम् = मार्ग की थकान के कारण नींद को। लब्धप्रबोधः = जागकर। बद्धम् = बँधा हुआ। कालपुरुषमिव = यमराज के समान। परुषम् = कठोर। अद्राक्षम् = देखा। निष्प्रत्याश एव = निराश होकर।

हिन्दी अनुवाद– उसके चले जाने पर हारीत के द्वारा प्रतिदिन भोजनादि सेवाओं को पाकर मैं बड़ा हुआ और मुझे पंख निकल आये। मुझमें उड़ने की शक्ति आ गई और मैं जाने योग्य हो गया। मुझे चन्द्रापीड की उत्पत्ति का ज्ञान नहीं था किन्तु महाश्वेता यहीं पर है तो वहीं चलकर रहूँ। ऐसा निश्चय करके प्रातःकाल विहार के लिए वहाँ से निकलकर उत्तर दिशा की ओर उड़ने लगा। उड़ने का अभ्यास न होने के कारण थोड़ी दूर ही जाने पर मेरे पंख शिथिल हो गये। इसीलिए मैं तालाब के किनारे वृक्ष के ऊपर बैठ गया। इसके बाद रास्ते की थकान के कारण मुझे नींद आ गई। बड़ी देर के बाद जब मैं जगा तो अपने को बँधा हुआ देखा और सामने यमराज के समान एक कठोर पुरुष को भी देखा। उसे देखकर निराश होकर उससे पूछा– भद्र तुम कौन हो? तुमने मुझे किसलिये बाँधा है?

व्याकरणात्मक टिप्पणी– उत्पन्नोत्पतनसामर्थ्यश्च = उत्पन्नः उत्पतनस्य सामर्थ्यः यस्मिन् स। सरस्तीरतरुनिकुंजस्योपरि = सरः तीरतरोः निकुंजस्योपरि। कालपुरुषमिव = कालपुरुषम् + इव।

॥ प्रश्नोत्तरः ॥

प्रश्न 1. प्रस्तुत गद्यांशस्य पुस्तकं लेखकञ्च नाम लिखत।
उत्तर– प्रस्तुत गद्यांशस्य पुस्तकं नाम 'चन्द्रापीडकथा' अस्य लेखकः च 'बाणभट्टः' अस्ति।

प्रश्न 2. "चिरादिव लब्धप्रबोधः बद्धम् आत्मानम् अपश्यम्।" रेखांकित अंश का अनुवाद कीजिए।
उत्तर– बड़ी देर के बाद जब मैं जागा तो अपने को बँधा हुआ देखा।

प्रश्न 3. केन प्रतिदिनम् आहारादिभिः उपचारैः संवर्ध्यमानः बभूव?
उत्तर– हारीतेन प्रतिदिनम् आहारादिभिः उपचारैः संवर्ध्यमानः बभूव।

प्रश्न 4. कं चन्द्रापीडोत्पत्तिपरिज्ञानं नास्ति?
उत्तर– शुकं चन्द्रापीडोत्पत्तिपरिज्ञानं नास्ति।

प्रश्न 5. कः प्रातर्विहारनिग्रत एव उत्तरां ककुभं गृहीत्वा अवहम्?
उत्तर– शुकः प्रातर्विहारनिग्रत एव उत्तरां ककुभं गृहीत्वा अवहम्।

➥ **स माम् उक्तवान्– "महात्मन्! अहं खलु जात्या चाण्डालः। मम खलु स्वामी पक्कणाधिपतिः इतः नातिदूरे कृतावस्थानः। तस्य दुहिता प्रथमे वयसि वर्तते। तस्याः त्वं केनापि दुरात्मना कथितः। तया च कौतुकात् त्वद्ग्रहणाय बहवः मादृशाः समादिष्टाः। तत् अद्य पुण्यैः मया आसादितोऽसि। तत्प्रा। तदहं तत्पादमूलं त्वां प्रापयामि। बन्धे मोक्षे वा सा प्रभवति" इति। अहं तु तत् श्रुत्वा चेतस्यकरवम्– "अहो मे मन्दपुण्यस्य दारुणः कर्मणां विपाकः। येन मया जगत्त्रय नमस्यस्य भगवतः श्वेतकेतोः स्वहस्तसंवर्धितेन भूत्वा, अधुना पक्कणमपि प्रवेष्टव्यम्। चाण्डालैः सह एकत्र स्थातव्यम्। चाण्डालबालजनस्य क्रीडनीयकेन भवितव्यम्। जरन्मातङ्गाङ्नाकरोपनीतैः कवलैः आत्मा पोषणीयः" इत्येतान्यन्यानि च चेतसा विलपन्तं माम् आदाय स चाण्डालः सर्वपापानाम् आवासभूतम् अतिभयंकरसंनिवशं पक्कणं प्रविश्य, तस्यै चाण्डालदारिकायै दर्शितवान्।**

शब्दार्थ– जात्या = जाति से। पक्कणाधिपतिः = चाण्डालों की बस्ती का मालिक। इतः = यहाँ से। नातिदूरः = समीप ही में। कृतावस्थानः = ठहरा हुआ। त्वद्ग्रहणाय = तुम्हें पकड़ने के लिए। बहवः = बहुत से। मादृशाः = मेरे जैसे लोगों। समादिष्टाः = आज्ञा पाये हैं। तत्पादमूलम् = उसके पास। आसादिताऽसि = पाये गये हो। प्रापयामि = पहुँचा देता हूँ। चेतस्यकरवम् = मन में विचार किया। मे मन्दपुण्य = मुझ पापी का। जगत्त्रयनमस्यस्य = तीनों लोकों के पूज्य। स्वहस्तसंवर्धितेन भूत्वा = स्वयं अपने हाथ से पाले-पोसे जाकर। स्थातव्यम् = रहना पड़ेगा। क्रीडनीयकेन = खिलौना। जरन्मातङ्गाङ्गनाकरोपनीतैः = बूढ़े चांडालों की पत्नियों के हाथों से लाये गये। चेतसा = हृदय से। आवासभूतम् = निवास स्थान। अतिभयंकरसन्निवशम् = अत्यंत भयंकर स्थान। प्रविश्य = प्रवेश करके। चाण्डालदारिकायैः = चाण्डाल कन्या को। दर्शितवान् = दिखाया।

हिन्दी अनुवाद– उसने मुझसे कहा– महात्मन् मैं जाति से चांडाल हूँ। मेरा स्वामी चांडाल की बस्ती का मालिक समीप में ही रहता है। उसकी कन्या नवयुवती है। उससे किसी दुष्ट ने तुम्हारे विषय में कहा था। उसने तुम्हें पकड़ने के लिए मेरे जैसे बहुत लोगों को आदेश दिया है। आज बड़े पुण्य से मैंने तुम्हें पा लिया है। इसलिए मैं तुम्हें उसके पास पहुँचा दूँगा। तुम्हें बाँधने या छोड़ देने में वही समर्थ है। मैंने यह सुनकर विचार किया कि मुझ अभागे के कर्मों का ही यह बुरा फल मिल रहा है, जिससे मैं तीनों लोक

में वन्दनीय भगवान् श्वेतकेतु के हाथों से पाला-पोसा हुआ होकर भी इस समय चाण्डालों की बस्ती में जाऊँगा चाण्डालों के साथ एक ही जगह रहूँगा। चाण्डाल बालकों का खिलौना बनूँगा। बूढ़ी चाण्डालिनों के हाथ से लाये गये भोजन से अपनी आत्मा का पालन करूँगा। इस प्रकार से तथा और अनेक प्रकार से विलाप करने वाले मुझको लेकर उस चाण्डाल ने सभी प्रकार के पापों की निवास भूमि अत्यन्त भयंकर चाण्डालों की बस्ती में आकर उस चाण्डाल कन्या को दिखाया।

व्याकरणात्मक टिप्पणी– कृतावस्थानः = कृत + अवस्थानः। चेतस्यकरवम् = चेतसि + अकरवम्।

॥ प्रश्नोत्तरः ॥

प्रश्न 1. उपर्युक्त गद्यांश की पुस्तक और लेखक का नाम लिखिए।

उत्तर– प्रस्तुत गद्यांश की पुस्तक का नाम 'चन्द्रापीडकथा' और इसके लेखक 'बाणभट्ट' हैं।

प्रश्न 2. 'अहो मे मन्दपुण्यस्य दारुणः कर्मणां विपाकः।' रेखांकित अंश का अनुवाद कीजिए।

उत्तर– अहो मुझ मन्दपुण्य (अभागे) के कठोर कर्मों का फल है।

प्रश्न 3. चाण्डालः केन अकथयत्–महात्मन्! अहं खलु जात्याः चाण्डालः?

उत्तर– चाण्डालः शुकेन अकथयत्–महात्मन्! अहं खलु जात्याः चाण्डालः।

प्रश्न 4. कस्य दुहिता प्रथमे वयसि वर्तते?

उत्तर– चाण्डालस्य स्वामी दुहिता प्रथमे वयसि वर्तते।

प्रश्न 5. कस्यै दर्शितवान्?

उत्तर– चाण्डालदारिकायै दर्शितवान्।

➥ **सा तु प्रहृष्टवदना स्वकरयुगेन आदाय माम् 'आः पुत्रक! प्राप्तोऽसि इत्यभिदधानैव मनाक् उद्घाटितद्वारे दारुपञ्जरे माम् आक्षिप्य अर्गलितद्वारा 'अत्रैव निर्वृतः तिष्ठ' इत्यभिधाय तूष्णीम् अस्थात्। अहं तु तथा संरुद्ध चेतस्यकरवम्– 'अहो महासंकटे पतितोऽस्मि। सर्व एवायम् अनियतेन्द्रियत्वस्य दोषः। तत् सर्वेन्द्रियाण्येव नियमयामि' इति निश्चित्य मौनग्रहणम् अकार्षम्। अथ च तया स्वपाणिनोपनीतेषु फलपानीयादिषु क्षुत्पिपासोपशमाय अशनक्रियाम् अङ्गीकृतवान् अस्मि।** (2020 ZS)

शब्दार्थ– प्रहृष्टवदना = प्रसन्न मुखवाली। स्वकरयुगेन = अपने दोनों हाथों से। आदाय माम् = मुझे लेकर। प्राप्तोऽसि = मिल गये। इत्यभिदधानैव = इस प्रकार कहती हुई। मानक् = थोड़ा सा। उद्घाटितद्वारे = खुले हुए द्वार वाले। दारुपंजरे = काठ के पिजड़े में। आक्षिप्य = डालकर। अर्गलितद्वारा = दरवाजा बन्द करके। निर्वृतः = निश्चिन्त होकर। तूष्णीम् = चुप। अस्थात् = बैठ गई। संरुद्ध = पिंजड़े में बन्द होकर। चेतस्यकरवम् = मन में विचार किया। अनियतेन्द्रियत्वस्य = इन्द्रियों के असंयम का। सर्वेन्द्रियाणि = सारी इन्द्रियों को। नियमयामि = संयमित करूँ। अकार्षम् = किया। स्वपाणिनोपनीतेषु = अपने हाथ से लाये गये। क्षुत्पिपासोपशमाय = भूख-प्यास की शांति के लिये। अशनक्रियाम् = भोजन करना। अंगीकृतवान् अस्मि = स्वीकार किया।

(2011 HR, HT, 12 EF, 13 BD, 16 TI, 17 ND, NH, NI, 18 BG, 20 ZO, ZR, ZT, ZU)

सन्दर्भ– प्रस्तुत सूक्ति कालिदास विरचित 'अभिज्ञानशाकुन्तलम्' के चतुर्थ अंक से अवतरित है।

हिन्दी व्याख्या – पति घर जाते समय चकवी-चकवा को अलग होकर व्याकुल होता देखकर दुःखी शकुन्तला से अनसूया कहती है कि हे सखि! ऐसा मत सोचो, अपने सहचर को कमलिनी के पत्ते तिरोहित देख चकवी चीखती है यह एक सीमा तक सच है, वह विरह पीड़ा में फँस जाती है, वह ठीक है लेकिन यह बिल्कुल सत्य है कि वह अपने प्रियतम के बिना दुःख से लम्बी रातों को केवल इस आशा में बिता देती है कि सुबह होगी, पुनर्मिलन होगा, यही आशा विरह दुःख को सहन कराती है।

8. अतिस्नेहः पापशङ्की। (2018 BD, BE, 19 DC, DD, DE, DF, 20 ZO, ZP, ZQ, ZT)

सन्दर्भ–प्रस्तुत सूक्ति 'अभिज्ञानशाकुन्तलम्' के चतुर्थ अङ्क से अवतरित है। इसके रचयिता महाकवि कालिदास हैं। इस सूक्ति में पतिगृह-गमन से पूर्व शकुन्तला अपनी सहेलियों से विदा ले रही है। उसे दुर्वासा के शाप का बिल्कुल भी ज्ञान नहीं है। दोनों सखियाँ जब शकुन्तला से कहती हैं कि यदि वह राजा तुम्हें पहचानने में देर करे तो उसे अँगूठी दिखा देना। यह सुनकर शकुन्तला अनिष्ट की आशङ्का से घबरा जाती है परन्तु दोनों सखियाँ उसे समझाती हुई कहती हैं–

हिन्दी व्याख्या–हे प्रिय सखि! शकुन्तला, डरो मत। स्नेह तो किसी अनिष्ट की आशङ्का व्यर्थ में ही करा देता है। हम जिससे स्नेह करते हैं, उसके विषय में हम हमेशा कुशलता भरी बातें ही सुनना चाहते हैं। समाचार न मिलने पर हम क्या-क्या सोच-विचार करते हैं, शङ्काएँ करते हैं, ये व्यर्थ की शङ्काएँ अतिस्नेह के कारण पैदा होती हैं। अतः तुम डरो मत कुछ नहीं होगा।

9. शान्तानुकूलपवनश्च शिवश्च पन्थाः। (2017 NC, NI, 18 BG, 19 DD, DE, DF, 20 ZT)

सन्दर्भ–यह सूक्ति कविकुलगुरु कालिदासविरचित 'अभिज्ञानशाकुन्तलम्' के चतुर्थ अङ्क से उद्धृत है।

हिन्दी व्याख्या–शकुन्तला के पतिगृह-गमन-काल में आशीर्वादात्मक ध्वनि सुनायी देती है कि ''जो बीच-बीच में कमलों से हरे-भरे तालाबों से रमणीय स्थानोंवाले, जिसमें छायादार वृक्षों द्वारा सूर्य की किरणों के ताप को नियन्त्रित किया जाय तथा जिसमें कमलों के पराग की कोमल धूलिवाली शान्त एवं अनुकूल वायु हो, वह मार्ग उसके लिए कल्याणकारी हो।''

10. ओदकान्तं स्निग्धो जनोऽनुगन्तथः। (2014 CP, 17 NG, NF, NH, 20 ZR)

सन्दर्भ–प्रस्तुत सूक्ति महाकवि कालिदास कृत 'अभिज्ञानशाकुन्तलम्' नाटक के चतुर्थ अङ्क से उद्धृत है।

हिन्दी व्याख्या–सूक्ति का अर्थ है–''जलाशय तक प्रिय व्यक्ति के साथ जाना चाहिए।'' शार्ङ्गरव महर्षि काश्यप (कण्व) से कहता है कि भगवन यात्रा के समय जलाशय तक प्रिय व्यक्ति के साथ जाना चाहिए–ऐसा सुना जाता है। स्मृतियों के अनुसार जब कोई अपना व्यक्ति बाहर जाने लगे तो घर के लोगों को चाहिए कि वे जलाशय अथवा किसी दुधारू वृक्ष तक उसे पहुँचायें। यहाँ संयोग से दोनों उपस्थित हैं। आश्रम के व्यक्तियों को लौटने की सलाह दी जा रही है।

11. सोऽयं न पुत्रकृतकः पदवीं मृगस्ते। (2017 NC, 18 BC, 19 CZ, 20 ZP, ZS)

सन्दर्भ–प्रस्तुत सूक्ति महाकवि कालिदास कृत 'अभिज्ञानशाकुन्तलम्' नाटक के चतुर्थ अङ्क से उद्धृत है। यहाँ पर शकुन्तला एवं मृग के पुत्रवत् प्रेम का चित्रण किया गया है।

हिन्दी व्याख्या—शकुन्तला पूछती है कि यह मेरे वस्त्रों को कौन खींच रहा है? तब महर्षि कण्व कहते हैं कि यह मृग तुम्हारे वस्त्र को खींच रहा है, जिसे कि तुमने श्यामाक (साँवा) की मुट्ठियों से खिलाकर बड़ा किया था, जिसे तुम पुत्रतुल्य मानती हो और जिसके मुख के घावों पर इंगुदी का तेल लगाया करती थी अर्थात् मातृस्नेह के कारण यह मृग तुम्हें यहाँ से आगे बढ़ने से रोकना चाहता है। यहाँ पर एक ओर शकुन्तला का आश्रम के जीवों के प्रति प्रेम व्यक्त हुआ है तो दूसरी ओर वन्य जीवों का शकुन्तला के प्रति स्नेह प्रदर्शित किया गया है।

12. मार्गे पदानि खलु ते विषमी भवन्ति। (2017 NC, 18 BC, BE, 20 ZU)

सन्दर्भ—प्रस्तुत सूक्ति महाकवि कालिदास कृत 'अभिज्ञानशाकुन्तलम्' नाटक के चतुर्थ अङ्क से उद्धृत है। यहाँ पर शकुन्तला के विदाई के समय होने वाले कष्ट की मनःस्थिति का चित्रण किया गया है।

हिन्दी व्याख्या—शकुन्तला से काश्यप कहते हैं कि तुम्हारे नेत्रों की बरौनियाँ ऊपर उठी हुई हैं। जब उनमें अँसू आ जाते हैं तो उनकी दर्शन शक्ति रुक जाती है। अतः धैर्य धारण कर इन आँसुओं को रोको। तात्पर्य यह है कि अश्रुपतन से अमंगल न हो, इसलिए उनको रोकने के लिए तुमने अपने नेत्र लोमों को ऊपर उठा रखा है। परन्तु फिर भी लगातार रोने के कारण जो आँसू आ जाते हैं, उनसे तुम्हारे मार्ग देखने की शक्ति रुद्ध हो जाती है। अतः धैर्य धारण कर इन लगातार बहने वाले आँसुओं को रोक लो। केवल अमंगल वारणार्थ नेत्र लोमों को ऊपर उठा लेना पर्याप्त नहीं है। रोना बन्द किये बिना अश्रुप्रवाह बन्द न होगा। सारांश यह है कि धीरज धारण कर इन आँसुओं को पोछ डालो, रोना बन्द करो। क्योंकि इन आँसुओं के कारण तेरी उठी हुई बरौनियों वाली आँखें ठीक से मार्ग नहीं देख पा रही हैं। अतएव इस ऊबड़-खाबड़ भूमि भाग वाले मार्ग पर तुम्हारे पैर लड़खड़ा रहे हैं एवं उल्टे-सीधे पड़ रहे हैं।

13. अद्य प्रभृति दूरपरिवर्तिनी ते खलु भविष्यामि। (2017 ND, 19 DA)

सन्दर्भ—प्रस्तुत सूक्ति महाकवि कालिदास कृत 'अभिज्ञानशाकुन्तलम्' नाटक के चतुर्थ अङ्क से उद्धृत है। यहाँ पतिगृह गमनार्थ लता के आलिंगन का वर्णन है।

हिन्दी व्याख्या—शकुन्तला वनज्योत्स्ना के पास जाकर तथा लता का आलिंगन करती हुई कहती है कि हे वनज्योत्स्ना! आम्र वृक्ष से लिपटी हुई भी तुम इधर की ओर आयी हुई अपनी शाखा रूपी भुजाओं से गले मिलो। आज से मैं तुमसे दूर हो जाऊँगी। मैं पतिगृह के लिए विदा हो रही हूँ। मेरा पुनरागमन कब होगा, इसे मैं नहीं जानती हूँ।

➡ अतिलघु उत्तरीय प्रश्न

प्रश्न 1. सख्यौ किं नाट्यन्त्यौ प्रविशतः?
उत्तर : सख्यौ कुसुमावचयं नाट्यन्त्यौ प्रविशतः।

प्रश्न 2. शकुन्तला केन विधिना निर्वृत्तकल्याणा संवृत्ता?
उत्तर : शकुन्तला गान्धर्वेण विधिना निर्वृत्तकल्याणा संवृत्ता।

प्रश्न 3. कीदृशी आकृतिः गुणविरोधिनो न भवति?
उत्तर : विशेषाकृतिः गुणविरोधिनो न भवति।

प्रश्न 4. कन्या कस्मै दातव्या?
उत्तर : गुणवते कन्या दातव्या।

प्रश्न 5. पितरः कदा कृतार्थाः भवन्ति?
उत्तर : पुत्र्यैः गुणवान् वरं दत्वा पितरः कृतार्थाः भवन्ति।

प्रश्न 6. शकुन्तला हृदयेन कुत्र स्थिता?
उत्तर : शकुन्तला हृदयेन राजा दुष्यन्तध्याने स्थिता।

प्रश्न 7. महर्षे दुर्वाससः आगमनकाले शकुन्तला कुत्र सन्निहितासीत्?
उत्तर : महर्षे दुर्वाससः आगमनकाले शकुन्तला उटजे सन्निहितासीत्।

प्रश्न 8. उटजस्थिता शकुन्तला केन शप्ता?
उत्तर : उटजस्थिता शकुन्तला दुर्वाससा शप्ता।

प्रश्न 9. नेपथ्ये 'अयमहं भो' इति को ब्रूते?
उत्तर : नेपथ्ये 'अयमहं भो' इति दुर्वासा ब्रूते।

प्रश्न 10. अद्य हृदयेन असन्निहता का अस्ति?
उत्तर : अद्य हृदयेन असन्निहता शकुन्तलाऽस्ति।

प्रश्न 11. शकुन्तला का आसीत्? (2016 TF)
उत्तर : शकुन्तला अतिथिपरिभाविनि आसीत्।

प्रश्न 12. आः अतिथिपरिभाविनि इति केन उक्तम्?
उत्तर : आः अतिथिपरिभाविनि इति दुर्वासा मुनिना उक्तम्।

प्रश्न 13. दुर्वासा प्रकृत्या कीदृशो महर्षिरासीत्? (2017 NI)
उत्तर : दुर्वासा प्रकृत्या सुलभकोपो महर्षिरासीत्।

प्रश्न 14. कस्मात् कारणात् दुर्वाससा शकुन्तला अभिशप्ता?
उत्तर : शकुन्तला दुर्वासायाः अतिथिसत्कारम् नाकरोत् अतः सः तां शप्तवान्।

प्रश्न 15. प्रकृतिवक्रः कः महर्षिः?
उत्तर : महर्षिः दुर्वासा प्रकृतिवक्रः।

प्रश्न 16. प्रियंवदया कः सानुक्रोशः कृतः?
उत्तर : प्रियंवदया दुर्वासा सानुक्रोशः कृतः।

प्रश्न 17. प्रियंवदयाः प्रार्थितः दुर्वासा शाप-निवारणाय कमुपायम् उक्तवान्?
उत्तर : दुर्वासा उक्तवान् यत् अभिज्ञान आभरण-दर्शनेन शापो निवर्तिष्यते।

प्रश्न 18. कस्य वचनम् अन्यथाभवितुं नार्हति?

उत्तर : दुर्वाससः वचनम् अन्यथाभवितुं नार्हति।

प्रश्न 19. शापः कथं निवर्तिष्यते?

उत्तर : शापोऽभिज्ञानभरणदर्शनेन निवर्तिष्यते।

प्रश्न 20 दुष्यन्तनामाङ्कितं किमाभरणम् शकुन्तला पार्श्वे आसीत्?

उत्तर : दुष्यन्तनामाङ्कितं अङ्गुलीयकं शकुन्तला पार्श्वे आसीत्।

प्रश्न 21. राजर्षिणा कीदृशम् अङ्गुलीयकं शकुन्तलायाः पिनद्धम्।

उत्तर : राजर्षिणा स्वनामधेयाङ्कितम् अङ्गुलीयकं शकुन्तलायाः पिनद्धम्।

प्रश्न 22. काश्यपेन शिष्यः किमर्थम् आदिष्टोऽस्ति?

उत्तर : काश्यपेन शिष्यः वेलोपलक्षणार्थम् आदिष्टोऽस्ति।

प्रश्न 23. शिष्यः गुरवे कां निवेदयति?

उत्तर : शिष्यः गुरवे उपस्थितां होमवेलां निवेदयति।

प्रश्न 24. राज्ञा दुष्यन्तेन शकुन्तलायां कीदृशम् आचरितम्?

उत्तर : राज्ञा दुष्यन्तेन शकुन्तलायां अनार्यम् आचरितम्।

प्रश्न 25. अनसूया कीदृशीं शकुन्तलां तातकाश्यपस्य निवेदयितुं न पारयति?

उत्तर : अनसूया दुष्यन्तपरिणीताम् आपन्नसत्त्वां शकुन्तलां तातकाश्यपस्य निवेदयितुं न पारयति।

प्रश्न 26. सुशिष्यदत्ता विद्येव का?

उत्तर : सुशिष्यदत्ता विद्येव शकुन्तला।

प्रश्न 27. का अशोचनीया संवृत्ता?

उत्तर : शकुन्तला अशोचनीया संवृत्ता।

प्रश्न 28. शकुन्तला विषये आकाशवाणी काश्यपं किमाह?

उत्तर : आकाशवाण्या शकुन्तला विषये काश्यपः उक्तः यत् ब्रह्मन्! स्वपुत्रीं शकुन्तलां दुष्यन्तस्य तेजोधारिणीं जानीहि।

प्रश्न 29. काश्यपेन किम् संकल्पितम्?

उत्तर : काश्यपेन संकल्पितम् यत् शकुन्तलां आत्म-सदृशं भर्तारं प्राप्तं कुर्यात्।

प्रश्न 30. भुवः भूतये शकुन्तला किं दधानाऽऽस्ते?

उत्तर : भुवः भूतये शकुन्तला दुष्यन्तेन आहितं तेजः दधानाऽऽस्ते।

प्रश्न 31. अग्निगर्भा शमीव का?

उत्तर : अग्निगर्भा शमीव शकुन्तला।

प्रश्न 32. शकुन्तलायाः आभरणोचितं रूपम् आश्रमसुलभैः प्रसाधनैः किं क्रियते?

उत्तर : शकुन्तलायाः आभरणोचितं रूपम् आश्रमसुलभैः प्रसाधनैः विप्रकार्यते।

प्रश्न 33. उपायनहस्तौ कौ प्रविशतः?

उत्तर : उपायनहस्तौ ऋषिकुमारौ प्रविशतः।

प्रश्न 34. किं विलोक्य सर्वे विस्मिताः?

उत्तर : अलङ्करणानि विलोक्य सर्वे विस्मिताः।

प्रश्न 35. अलङ्करणानि कुत्र प्राप्तानि?

उत्तर : अलङ्करणानि तात काश्यपप्रभावात् प्राप्तानि।

प्रश्न 36. पतिगृहगमनकाले शकुन्तलायै केन-केन के-के उपहाराः प्रदत्ताः?
उत्तर : पतिगृहगमनकाले शकुन्तलायै केनचित् वृक्षेण चन्द्रधवलं क्षौमं, केनचित् चरणरञ्जनार्थं लाक्षारसं दत्तं, वनदेवताभिश्च आभूषणानि दत्तानि।

प्रश्न 37. शकुन्तलायाः पतिगृहगमनं विचिन्त्य काश्यपस्य कीदृशी अवस्था अभवत्?
उत्तर : शकुन्तलायाः पतिगृहगमनं विचिन्त्य काश्यपस्य हृदयं उत्कण्ठितम् जातम्।

प्रश्न 38. का व्रीडां रूपयति?
उत्तर : शकुन्तला व्रीडां रूपयति।

प्रश्न 39. ऋषिकुमारकौ वनस्पतिसेवां कस्मै निवेदयतः?
उत्तर : ऋषिकुमारकौ वनस्पतिसेवां अभिषेकोत्तीर्णाय काश्यपाय निवेदयतः।

प्रश्न 40. शकुन्तलावियोगम् उत्प्रेक्ष्य काश्यपः किम्भूतो भवति?
उत्तर : शकुन्तलावियोगम् उत्प्रेक्ष्य काश्यपः स्तम्भिवाष्पवृत्तिकलुषो भवति।

प्रश्न 41. काश्यपः केन छन्दसा आशास्ते?
उत्तर : काश्यपः ऋक्छन्दसा आशास्ते।

प्रश्न 42. शकुन्तलां के पावयन्तु?
उत्तर : शकुन्तलां वैताना वह्नयः पावयन्तु।

प्रश्न 43. किम्भूताः वैतानाः वह्नयः शकुन्तलां पावयन्तु?
उत्तर : वेदीं परितः क्लृप्तधिष्ण्याः, समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः, हव्यगन्धैः दुरितम् अपघ्नन्तः वैतानाः वह्नयः शकुन्तलां पावयन्तु।

प्रश्न 44. केषु अपीतेषु शकुन्तला जलं पातुं न व्यवस्यति?
उत्तर : वनवृक्षेषु अपीतेषु शकुन्तला जलं पातुं न व्यवस्यति।

प्रश्न 45. वृक्षेषु अपीतेषु शकुन्तला किं कर्तुं न व्यवस्यति?
उत्तर : वृक्षेषु अपीतेषु शकुन्तला जलं पातुं न व्यवस्यति।

प्रश्न 46. वृक्षाणाम् आद्ये कुसुमप्रसूतिसमये शकुन्तलायाः किं भवति?
उत्तर : वृक्षाणाम् आद्ये कुसुमप्रसूतिसमये शकुन्तलायाः उत्सवः भवति।

प्रश्न 47. शकुन्तला कुत्र याति?
उत्तर : शकुन्तला पतिगृहं याति।

प्रश्न 48. शकुन्तला कैः अनुज्ञातम्?
उत्तर : शकुन्तला सन्निहितैः तपोवनतरुभिः अनुज्ञातम्।

प्रश्न 49. वनवासबन्धुभिः कैः शकुन्तला अनुमतगमना?
उत्तर : वनवासबन्धुभिः तरुभिः शकुन्तला अनुमतगमना।

प्रश्न 50. वनौकसोऽपि सन्तो लौकिकज्ञा वयम् इति कस्योक्तिः? (2016 TD)
उत्तर : वनौकसोऽपि सन्तो लौकिकज्ञा वयम् इति काश्यपस्योक्तिः।

प्रश्न 51. वनौकसोऽपि मुनयः कीदृशाः भवन्ति? (2016 TF)
उत्तर : वनौकसोऽपि मुनयः लौकिकज्ञा भवन्ति।

➡ बहुविकल्पीय प्रश्न

नोट : निम्नलिखित प्रश्नों के सही विकल्प चुनकर लिखिए—

1. **शकुन्तलां शापं कः अददात्?**
(अथवा) शकुन्तलायै केन शापः दत्तः?
(अथवा) शकुन्तला केन शप्ताऽभूत्? (2012 EH, 14 CR)
(क) कण्वः (ख) गौतमी (ग) दुर्वासाः (घ) विश्वामित्रः
उत्तर— (ग) दुर्वासाः।

2. **'कोऽन्योहुतवहाद् दग्धुं प्रभवति' — यह कथन किसका है?**
(क) प्रियंवदा (ख) अनसूया (ग) गौतमी (घ) कण्व
उत्तर— (क) प्रियंवदा।

3. **अवसितमण्डना का आसीत्?**
(क) प्रियंवदा (ख) अनसूया (ग) शकुन्तला (घ) गौतमी
उत्तर— (ग) शकुन्तला।

4. **'उपस्थितां होमवेलां गुरवे निवेदयामि' यह वाक्य किसके द्वारा कहा गया है?**
(क) प्रियंवदा (ख) अनसूया (ग) गौतमी (घ) शिष्य **उत्तर—** (घ) शिष्य।

5. **प्रतिपेलवा का?**
(क) प्रियंवदा (ख) गौतमी (ग) शकुन्तला (घ) अनसूया
उत्तर— (ग) शकुन्तला।

6. **कन्या कीदृशोऽर्थः?**
(क) परकीयो (ख) स्वकीयो (ग) पितरौ (घ) एतेषु न कश्चिदपि
उत्तर— (क) परकीयो।

7. **दुष्यन्तः कस्य राज्यस्य (कुत्रत्यः) राजा आसीत्?** (2011 HU, 12 EG, 13 BD)
(क) कोशलस्य (ख) विदर्भस्य (ग) मधुरायाः (घ) हस्तिनापुरस्य
उत्तर— (घ) हस्तिनापुरस्य।

8. **'शिवास्ते पन्थानः सन्तु' यह कथन किसका है?**
(क) गौतमी का (ख) काश्यप का (ग) प्रियंवदा का (घ) अनसूया का
उत्तर— (ख) काश्यप का।

9. **कालिदासस्य प्रसिद्धोऽलङ्कारोऽस्ति—**
(क) अर्थान्तरन्यासः (ख) श्लेषः (ग) उपमा (घ) रूपकम् **उत्तर—** (ग) उपमा।

10. **'गुणवते कन्यका प्रतिपादनीया' इस उक्ति का वक्ता है—** (2019 DB)
अथवा 'गुणवते कन्यका प्रतिपादनीया।' यह उक्ति किसकी है? (2020 ZR, ZT)
(क) दुष्यन्त (ख) नारद (ग) अनसूया (घ) शकुन्तला
उत्तर— (ग) अनसूया।

11. **'सौभाग्यदेवताऽर्चनीया' वाक्य आया है—**
(क) प्रियंवदा के लिए (ख) शकुन्तला के लिए (ग) अनसूया के लिए (घ) गौतमी के लिए
उत्तर— (ख) शकुन्तला के लिए।

12. **''एष दुर्वासाः सुलभकोपो महर्षिः'' केन कथितम् इदं वाक्यम्?** (2011 HR, 12 EE, 14 CN)
(क) अनसूयया (ख) गौतम्या (ग) प्रियंवदया (घ) शकुन्तलया
उत्तर— (ग) प्रियंवदया।

13. **निम्नलिखित में से कौन-सी रचना कालिदास की है?** (2018 BE)
(क) उत्तररामचरितम् (ख) मृच्छकटिकम् (ग) मेघदूतम् (घ) प्रतिमानाटकम्
उत्तर— (ग) मेघदूतम्।

14. 'को नामोष्णोदकेन नवमालिकां सिञ्चति' वाक्य की वक्ता है–
(क) प्रियंवदा (ख) अनसूया (ग) गौतमी (घ) मैत्रेयी
उत्तर– (क) प्रियंवदा।

15. कस्मिन् समये शकुन्तलायाः उत्सवः भवति?
(क) कुसुम प्रसूति समये (ख) वर्षाकाले (ग) वसन्तागमने (घ) मृगीप्रसूति समये
उत्तर– (क) कुसुम प्रसूति समये।

16. चतुर्थे अंके कस्य रसस्य निष्पत्तिः अभवत् ?
(क) संयोग शृंगारस्य (ख) वियोग शृंगारस्य (ग) अद्भुत रसस्य (घ) हास्य रसस्य
उत्तर– (ख) वियोग शृंगारस्य।

17. 'सुशिष्यपरिदत्ता विद्येवाशोचनीयासि संवृत्ता' वाक्य किसके लिए कहा गया है–
(क) गौतमी के लिए (ख) प्रियंवदा के लिए (ग) नारद के लिए (घ) शकुन्तला के लिए
उत्तर– (घ) शकुन्तला के लिए।

18. इष्टप्रवासजनितान्यबलाजनस्य दुःखानि नूनमतिमात्रसुदुःसहानि' उक्ति है–
(क) कण्व की (ख) शिष्य की (ग) गौतमी की (घ) अनसूया की
उत्तर– (ख) शिष्य की।

19. प्रियंवदायाः सख्याः किन्नाम आसीत्?
(क) शकुन्तला (ख) अनसूया (ग) मैत्रेयी (घ) गार्गी
उत्तर– (क) शकुन्तला।

20. 'प्रकृतिवक्र' है–
अथवा 'प्रकृतिवक्र' कौन है? (2020 ZT, ZP)
(क) शारद्वत (ख) शार्ङ्गरव (ग) दुर्वासा (घ) नारद
उत्तर– (ग) दुर्वासा।

21. कः आसीत् सुलभकोपो महर्षिः? (2014 CO, 20 ZT)
(अथवा) सुलभकोपो महर्षिः कः आसीत्? (2017 NF)
(क) काश्यप (ख) कण्व (ग) नारद (घ) दुर्वासा
उत्तर– (घ) दुर्वासा।

22. काश्यप को शकुन्तला के विवाह की सूचना किसने दी है–
(क) प्रियंवदा ने (ख) गुरु ने (ग) अशरीरी छन्दोमयी वाणी ने (घ) नारद ने
उत्तर– (ग) अशरीरी छन्दोमयी वाणी ने।

23. पतिगृहं गच्छन्त्या शकुन्तलया सह का गच्छत्?
(अथवा) महर्षि कण्वेन पति गृहं गच्छन्त्या शकुन्तलया सह का प्रेषिता?
(अथवा) शकुन्तलया सह हस्तिनापुरं का गता?
(क) अनसूया (ख) प्रियंवदा (ग) गौतमी (घ) वृद्धतापसी
उत्तर– (ग) गौतमी।

24. कुसुम प्रसूति समये कस्याः उत्सव भवति स्म? (2018 BD)
(क) प्रियंवदायाः (ख) अनसूयायाः (ग) शकुन्तलायाः (घ) गौतम्याः
उत्तर– (ग) शकुन्तलायाः।

25. 'वत्से! वीरप्रसविनी भव' यह आशीर्वाद है–
(क) गौतमी का (ख) पहली तापसी का (ग) अनसूया का (घ) तीसरी तापसी का
उत्तर– (घ) तीसरी तापसी का।

26. तृतीय तापसी का आशीर्वाद है– (2019 DA)
(क) वत्से! सुखं लभस्व (ख) वत्से! भर्तुर्बहुमता भव (ग) वत्से! वीरप्रसविनी भव (घ) एतेषु न कश्चिदापि
उत्तर– (ख) वत्से! भर्तुर्बहुमता भव।

27. शकुन्तलासाकं राजकुलं का गता।
(अथवा) प्रस्थान काले शकुन्तलया सह गच्छति। (2019 DA)
(क) प्रियंवदा (ख) अनसूया (ग) गौतमी (घ) मेनका
उत्तर– (ग) गौतमी।

28. कस्याः प्रस्थानकौतुकं निवर्त्यताम्–
(क) शकुन्तलायाः (ख) अनसूयायाः (ग) प्रियंवदायाः (घ) एतेषु न कश्चिदपि
उत्तर– (क) शकुन्तलायाः।

29. शकुन्तलां कोऽपालयत्? (2013 BI, 19 DA, 20 ZQ, ZS)
अथवा **शकुन्तला कस्य पालिता पुत्री आसीत्?** (2011 HQ, 12 EJ, 18 BE, 19 DF)
(क) वशिष्ठः (ख) अगस्त्यः (ग) विश्वामित्रः (घ) कण्वः
उत्तर– (घ) कण्वः।

30. संस्कृतमाश्रित्य पठति–
(क) शकुन्तला (ख) प्रियंवदा (ग) गौतमी (घ) एतेषु न कश्चिदपि
उत्तर– (ख) प्रियंवदा।

31. ''पादयोः प्रणम्य निवर्तयैनं''–किसका कथन है?
(क) शकुन्तला (ख) प्रियंवदा (ग) अनसूया (घ) गौतमी
उत्तर– (ग) अनसूया।

32. 'शान्तानुकूल पवनश्च शिवश्च पन्थाः' किसका कथन है?
(क) वशिष्ठ का (ख) काश्यप का (ग) प्रियंवदा का (घ) दुष्यन्त का
उत्तर– उपर्युक्त किसी का नहीं। यह आकाशवाणी है।

33. अभिज्ञानशाकुन्तलस्य कविः (रचयिता) कः अस्ति? (2016 TH)
(क) राजशेखरः (ख) भवभूतिः (ग) भट्टनारायणः (घ) कालिदासः
उत्तर– (घ) कालिदासः।

34. शकुन्तलायाः निवसने सज्जते–
(क) वनज्योत्स्ना (ख) पुत्रकृतकः मृगः (ग) लता (घ) हरिणः
उत्तर– (ख) पुत्रकृतकः मृगः।

35. ''न खलु धीमतां कश्चिद् विषयो नाम''–किसका कथन है? (2013 BG, 20 ZU)
(क) शारद्वत (ख) विदूषक (ग) कण्व (घ) शाङ्र्गरव
उत्तर– (घ) शाङ्र्गरव।

36. गुर्वपि विरहदुःखमाशाबन्धः साहयति इति वचनं आह–
(क) काश्यपः (ख) गौतमी (ग) अनसूया (घ) एतेषु न कश्चिदपि
उत्तर– (ग) अनसूया।

37. शकुन्तलायाः मातुः नाम आसीत्। (2011 HW, 13 BC)
(अथवा) शकुन्तलायाः जननी कास्ति? (2020 ZR)
(अथवा) शकुन्तलायाः माता का?
(क) मेनका (ख) सुमित्रा (ग) गार्गी (घ) उर्वशी
उत्तर– (क) मेनका।

38. शकुन्तलायाः दुष्यन्ते स्नेहप्रवृत्तिः अस्ति–
(क) बान्धवकृता (ख) अबान्धवकृता (ग) पूर्वजन्मकृता (घ) एतेषु न कश्चिदपि
उत्तर– (ख) अबान्धवकृता।

39. वनौकसौऽपि सन्तो लौकिकज्ञा वयम् इति वचनम् आह– (2016 TD)
(क) शारद्वतः (ख) काश्यपः (ग) शिष्यः (घ) एतेषु न कश्चिदपि
उत्तर– (ख) काश्यपः।

40. दुष्यन्तः कः आसीत् ? (2014 CP, 16 TG)
(क) राजा (ख) मन्त्री (ग) तपस्वी (घ) कुलपतिः
उत्तर– (क) राजा।

41. 'तात! वन्दे' इति वचनम् आह–
(क) प्रियंवदा (ख) शकुन्तला (ग) अनसूया (घ) गौतमी
उत्तर– (ख) शकुन्तला।

42. 'ओदकान्तं स्निग्धो जनोऽनुगन्तव्यः' इस वाक्य का वक्ता है–
(क) काश्यपः (ख) शार्ङ्गरव (ग) नारद (घ) गौतमी
उत्तर– (ख) शार्ङ्गरव।

43. 'गुर्वपि विरहदुःखमाशाबन्धः साहयति' वाक्य कहा है–
(क) अनसूया ने (ख) प्रियंवदा ने (ग) शकुन्तला ने (घ) नारद ने
उत्तर– (क) अनसूया ने।

44. वैतानास्त्वां वह्नयः पावयन्तु-का वक्ता कौन है?
(क) शार्ङ्गरव (ख) गौतमी (ग) प्रियंवदा (घ) काश्यप
उत्तर– (घ) काश्यप।

45. काश्यपः कः आसीत्?
(क) मन्त्री (ख) तपस्वी (ग) राजा (घ) भृत्यः
उत्तर– (ख) तपस्वी।

46. किं शीलः तपस्विजनः?
(क) सुखशीलः (ख) दुखशीलः (ग) कर्मशीलः (घ) एतेषु न कश्चिदपि
उत्तर– (ख) दुःखशीलः।

47. प्रियम्वदा कस्याः सखी आसीत् ? (2010 BY)
(क) दुष्यन्तस्य (ख) अनसूयायाः (ग) शकुन्तलायाः (घ) गौतम्याः
उत्तर– (ग) शकुन्तलायाः।

48. प्रियमण्डना का आसीत्?
(क) प्रियंवदा (ख) अनसूया (ग) शकुन्तला (घ) वनदेवता
उत्तर– (ग) शकुन्तला।

49. नवमालिका केन संश्रितवती?
(क) चूतेन (ख) पूतेन (ग) दूतेन (घ) एतेषु न कश्चिदपि
उत्तर– (क) चूतेन।

50. दुष्यन्तः राजा आसीत् कस्य राजस्य? (2012 EG, 13 BD)
अथवा दुष्यन्तः कस्य देशस्य राजा आसीत्? (2020 ZO)
(क) वाराणसी नगरस्य (ख) मिथिला राजस्य (ग) हस्तिनापुरस्य (घ) कुरु प्रदेशस्य
उत्तर– (ग) हस्तिनापुरस्य।

51. व्रीडां रूपयति–
(क) गौतमी (ख) प्रियंवदा (ग) अनसूया (घ) एतेषु न कश्चिदपि
उत्तर– (घ) एतेषु न कश्चिदपि।

52. कालिदास के प्रमुख नाटक का नाम है–
(क) मालविकाग्निमित्रम् (ख) अभिज्ञानशाकुन्तलम्
(ग) उत्तररामचरितम् (घ) ऋतुसंहारम्
उत्तर– (ख) अभिज्ञानशाकुन्तलम्।

53. 'विक्रमोर्वशीयम्' किसकी कृति है? (2019 CZ, 20 ZP)
***अथवा* 'विक्रमोर्वशीयम्' के रचयिता कौन हैं?** (2019 DF)
(क) कालिदास की (ख) भवभूति की (ग) शूद्रक की (घ) भास की
उत्तर– (क) कालिदास की।

54. 'मालविकाग्निमित्रम्' किसकी कृति है?
(अथवा) 'मालविकाग्निमित्रम्' के रचयिता कौन हैं? (2014 CN)
(क) भवभूति (ख) भास (ग) शूद्रक (घ) कालिदास
उत्तर– (घ) कालिदास।

55. शकुन्तला कस्य ऋषेः आश्रमे न्यवसत्? (2010 CC)
(क) विश्वामित्रस्य (ख) वशिष्ठस्य (ग) कण्वस्य (घ) दुर्वासामुनेः
उत्तर– (ग) कण्वस्य।

56. अभिज्ञानशाकुन्तले मुख्यः रसः कः? (2010 CD, 11 HS)
(अथवा) अभिज्ञानशाकुन्तलस्य प्रधान रसः अस्ति। (2013 BF, 16 DN)
(क) करुण रसः (ख) शान्त रसः (ग) वीर रसः (घ) शृङ्गार रसः
उत्तर– (घ) शृङ्गार रस।

57. शकुन्तला अनन्यमानसा कं विचिन्तयन्ती आसीत्? (2011 HT, 14 CL)
(अथवा) कं विचिन्तयन्ती शकुन्तला ऋषिरागमनम् न अजायत्? (2013 BH)
(क) वशिष्ठम् (ख) कण्वम् (ग) दुष्यन्तम् (घ) कमपि तपोधनं
उत्तर– (ग) दुष्यन्तम्।

58. कन्या वस्तुतः कस्य धनम् आसीत्? (2012 EF, 13 BF)
(क) गुरोः (ख) मातृपित्रोः (ग) परकीयम् (घ) जन्मदातुः
उत्तर– (ग) परकीयम्।

59. कन्या कस्मै प्रतिपादनीया? (2012 EI)
(क) कदर्याय (ख) वीरपुरुषाय (ग) गुणवते (घ) मानिने
उत्तर– (ग) गुणवते।

60. नवैः तनयाविश्लेषदुःखैः के पीडयन्ते? (2014 CM)
(क) मातरः (ख) पितरः (ग) गुरुवः (घ) गृहिणः
उत्तर– (घ) गृहिणः।

61. शकुन्तलायाः जनकः कः आसीत्? (2014 CQ, 17 NI)
(क) कण्वः (ख) वसिष्ठः (ग) विश्वामित्रः (घ) भूरिश्रवा
उत्तर– (ग) विश्वामित्रः।

62. शकुन्तला कण्वस्य कीदृशी पुत्री आसीत्? (2017 NC)
(क) पालिता (ख) क्रीता (ग) औरसी (घ) निक्षिप्ता
उत्तर– (क) पालिता।

63. परित्यक्तनर्तनाः के? (2017 NC)
(क) मृगाः (ख) मयूराः (ग) शुकाः (घ) शशकाः
उत्तर– (ख) मयूराः।

64. शकुन्तलायाः गमेन मृगीभिः के परित्यक्ताः? (2017 ND)
(क) नर्तनानि (ख) दर्भकवलाः (ग) भ्रमणानि (घ) उत्पतनानि
उत्तर– (ख) दर्भकवलाः।

65. 'लताभगिनी' वनज्योत्स्नां तावदामंत्रयिष्ये।' इति कस्याः उक्तिः? (2017 ND)
(क) शकुन्तलायाः (ख) प्रियंवदायाः (ग) अनसूयायाः (घ) परिचारिकायाः
उत्तर– (क) शकुन्तलायाः।

66. शकुन्तलायाः पतिगृहगमनकाले कस्य हृदयम् उत्कण्ठितं जातम्? (2017 NF)
(क) कण्वस्य (ख) प्रियंवदायाः (ग) विदूषकस्य (घ) शारद्वतस्य
उत्तर– (क) कण्वस्य।

67. 'स्नेहप्रवृत्तिरेवंदर्शिनी' इति कस्योक्तिः? यह कथन किसका है? (2017 NG)
(क) गौतम्याः/गौतमी का (ख) काश्यपस्य/काश्यप का
(ग) अनसूयायाः/अनसूया का (घ) प्रियंवदायाः/प्रियंवदा का
उत्तर– (ख) काश्यपस्य/काश्यप का।

68. कन्या कस्मै दातव्या? (2017 NH)

(क) कुलवते कन्या दातव्या (ख) विद्यावते कन्या दातव्या
(ग) गुणवते कन्या दातव्या (घ) धनवते कन्या दातव्या

उत्तर– (क) कुलवते कन्या दातव्या।

69. दुष्यन्तः कस्य देशस्य राजा आसीत्? (2017 NH, 19 DE)

(क) हस्तिनापुरस्य राजा आसीत् (ख) कोशलस्य राजा आसीत्
(ग) पाटलिपुत्रस्य राजा आसीत् (घ) मथुरायाः राजा आसीत्

उत्तर– (क) हस्तिनापुरस्य राजा आसीत्।

70. भर्तारमालसदृशं सुकृतैर्गता त्वम्'' इति वाक्यं कस्याः विषये कथितम्? (2018 BC)

(क) शकुन्तलायाः (ख) अनसूयायाः (ग) प्रियंवदा (घ) गौतम्याः

उत्तर– (क) शकुन्तलायाः।

71. श्यामकमुष्टिपरिवर्धितकः पुत्रकृतः कः अस्ति? (2018 BC)

(क) धीवरः (ख) तरवः (ग) मृगः (घ) सिंहः

उत्तर– (ग) मृगः।

72. 'हला! एषा युवयोर्हस्ते निक्षेपः' इति कथनं कस्यास्ति? (2018 BG)

(क) दुष्यन्तस्य (ख) शकुन्तलायाः (ग) गौतम्याः (घ) प्रियंवदायाः

उत्तर– (ख) शकुन्तलायाः।

73. काश्यपः केन छन्दसा आशास्ते? (2018 BG)

(क) ऋक्छन्दसा (ख) यजुश्छन्दसा (ग) सामछन्दसा (घ) बिनाछन्दसा

उत्तर– (क) ऋक्छन्दसा।

74. दुर्वासा प्रकृत्या कीदृशी महर्षिरासीत्? (2019 CZ)

(क) क्षमाशीलः (ख) निर्लोभी (ग) सुलभकोपी (घ) अति विनयी

उत्तर– (ग) सुलभकोपी।

75. निम्नलिखित में से कौन-सी रचना कालिदास की है? (2019 DB)

(क) उत्तररामचरितम् (ख) प्रतिमानाटकम् (ग) मृच्छकटिकम् (घ) अभिज्ञानशाकुन्तलम्

उत्तर– (घ) अभिज्ञानशाकुन्तलम्।

76. अभिज्ञानशाकुन्तलम् किसकी रचना है? (2019 DC, DE)

(क) भवभूति (ख) भास (ग) शूद्रक (घ) कालिदास

उत्तर– (घ) कालिदास।

77. सुशिष्यदत्ता विद्येव का? (2019 DC)

(क) अनसूया (ख) शकुन्तला (ग) प्रियंवदा (घ) गौतमी

उत्तर– (ख) शकुन्तला।

78. 'रघुवंश महाकाव्यम्' किसकी कृति है? (2019 DD, 20 ZQ)

(क) भारवि (ख) भवभूति (ग) कालिदास (घ) अश्वघोष

उत्तर– (ग) कालिदास।

79. शकुन्तलां शापं कः अददात्? (2019 DD, 20 ZU)

(क) दुर्वासाः (ख) विश्वामित्रः (ग) कण्वः (घ) परशुरामः

उत्तर– (क) दुर्वासाः।

80. निम्नलिखित में से कौन-सी रचना कालिदास की नहीं है? (2020 ZS)

(क) रघुवंश महाकाव्यम् (ख) उत्तररामचरितम् (ग) अभिज्ञान शाकुन्तलम् (घ) मेघदूतम्

उत्तर– (क) उत्तररामचरितम्।

खण्ड - 'घ'

निबन्ध

नवीनतम पाठ्यक्रमानुसार इस प्रश्न के अन्तर्गत प्रश्न-पत्र में दिये गये किसी एक विषय पर 15 पंक्तियों में संस्कृत में निबन्ध लिखना होता है, जिसके लिए 10 अंक निर्धारित हैं। (अंक 10)

ऐसे लिखें निबन्ध

निबन्ध लिखना भी एक कला है। इसके लिए अनुवादों के नियमों को ध्यान में रखना आवश्यक है। सबसे अच्छा निबन्ध वह समझा जाता है, जो छात्र अपनी योग्यता से सोच-समझकर लिखता है। पुस्तक से रट कर निबन्ध लिखने पर अशुद्धियाँ भी हो जाती हैं और अंक भी कम मिलते हैं। इसलिए निबन्ध लिखने के लिए निम्नलिखित बातों को ध्यान में रखना चाहिए–

1. जिस विषय पर निबन्ध लिखना हो, सबसे पहले उस विषय पर शान्त-चित्त से विचार करना चाहिए कि इस विषय में कौन-कौन-सी बातें रखी जानी हैं।

2. जब यह ध्यान में आ जाय कि इस विषय पर ये-ये बातें लिखनी हैं तब उन सब बातों को हिन्दी में लिख लेना चाहिए। लिखते समय वाक्य बहुत छोटे-छोटे और सरल होने चाहिए। निबन्ध लिखते समय कभी भी लम्बे और क्लिष्ट वाक्य मत लिखिए।

3. इसके बाद उन वाक्यों को क्रम से लगा लीजिए अर्थात् एक तरह की बात कहनेवाले वाक्यों को एक साथ रखिए फिर वाक्यों को इस दृष्टि से पढ़िए कि इनका अनुवाद संस्कृत में करना है। यदि किसी वाक्य के अनुवाद करने में कठिनाई हो रही है तो उस वाक्य को पलट कर ऐसा बना लीजिए जिसका शुद्ध अनुवाद आप कर सकें।

4. अपने विद्यालय, गाँव, पिता, अध्यापक आदि का नाम भी आप पलट दीजिए– यदि वह अनुवाद करने में कठिनाई पैदा कर रहा है। जैसे– मेरे विद्यालय का नाम हरचरन शिवचरन लाल शिक्षा मन्दिर इण्टर कालेज, जलेसर है। इस वाक्य को बदल कर इस प्रकार लिख लीजिए– 'मेरे विद्यालय का नाम आदर्श शिक्षा मन्दिर है। यह जलेसर में स्थित है।' आपके विद्यालय में उन्तीस अध्यापक हैं। आप उन्तीस की संस्कृत नहीं जानते हैं, तो अध्यापकों की संख्या घटा-बढ़ा कर ऐसी कर लीजिए, जिसकी संस्कृत आप आसानी से बना सकें। यदि आप संख्याओं की संस्कृत जानते ही नहीं, तो अंकों में भी लिख सकते हैं (जैसे– विंशतिः अध्यापकाः के स्थान पर 20 अध्यापकाः) फिर दूसरे वाक्य लिखिए। हमारा विद्यालय विशाल है। इसमें छात्र पढ़ते हैं। एक प्रधानाचार्य हैं। प्रधानाचार्य सज्जन हैं। कृष्णदत्त हमारे कक्षाध्यापक हैं। विद्यालय में एक उद्यान है। उसमें फूलों के पेड़ हैं। इसमें हम खेलते हैं इत्यादि। सीधे-सादे वाक्य लिखकर उनका संस्कृत में अनुवाद कर दीजिए। यह मत सोचिए कि हमारे विद्यालय में तो उद्यान नहीं है, हम कैसे लिखें? निबन्ध लिखते समय जो आपके यहाँ हैं, उससे कोई विशेष तात्पर्य नहीं है। देखना तो यह है कि आप संस्कृत में अपने विचार प्रकट कर सकते हैं अथवा नहीं।

5. प्रारम्भ में ऐसे सरल वाक्य बनाने में परेशानी होती है और वाक्य नहीं बन पाते; किन्तु कुछ दिन अभ्यास करने के उपरान्त वाक्य बनाना आ जाता है और उनका संस्कृत में अनुवाद करके बड़ी आसानी से चाहे जिस विषय पर आप निबन्ध लिख सकते हैं।

➡ (1) रक्षाबन्धन

[2014 CT]

भारतदेशे उत्सवानाम् प्राचुर्यं वर्तते। अत्र अनेके उत्सवाः प्रचलन्ति। यथा धार्मिकोत्सवाः, सामाजिकोत्सवाः, महापुरुषजन्मोत्सवाः, राष्ट्रियोत्सवाः च। एषु उत्सवेषु धार्मिकोत्सवाः महत्त्वपूर्णाः यतः भारतीयाः धर्मप्राणाः सन्ति। तेष्वपि रक्षाबन्धनोत्सवः विशेषेण महत्त्वपूर्णः अस्ति। अस्योत्सवस्य महत्त्वं सर्वं एव स्वीकुर्वन्ति।

अयं महोत्सवः श्रावणमासस्य पूर्णिमायां भवति। अयं समयः अति मनोरमम् भवति। भूमौ सर्वत्र हरीतिमा दृश्यते। वृक्षेषु कूजन्तः पक्षिणः श्रवणयोः मधु इव क्षरन्ति एवंविधे समये अयम् उत्सवः सर्वान् मोदयति। पुराणानुसारं सर्वप्रथमम् इन्द्रपत्न्या स्वपतेः इन्द्रस्य दानवेभ्यः रक्षणार्थम् तस्य हस्ते रक्षासूत्रं बद्धम्। ततः एवं अयमुत्सवः प्रवर्तितः। ततः अनेनैव रक्षासूत्रेणैव इन्द्रेण दानवेन्द्रो बलिः बद्धः।

भारतीयेतिहासे राजपुत्राणां समये राज्ञः स्वरक्षार्थम् एकं बलवतं राजानं निजभ्रातरं मत्वा तस्य हस्ते रक्षाबन्धनम् अकुर्वन्। पुरा अस्मिन्नेव दिने ऋषयः ब्राह्मणाश्च यजमानानां हस्तेषु रक्षासूत्रम् अबध्नन्। ते राजानः यजमानाश्च तेभ्यः प्रचुरं द्रव्यं यच्छन्ति स्म। अधुना तु ब्राह्माणाः सर्व एव न, अपितु केचिदेव, भिक्षुकाः भूत्वा अति स्वल्पधनार्थम् प्रतिगृहं गच्छन्ति–अयं महान् खेदजनकः विषयः।

अयमुत्सवः प्राधान्येन ब्राह्मणानाम् अस्ति किन्तु अधुना सर्ववर्णमानवाः इमम् उत्सवम् अभिनन्दन्ति। अस्मिन् दिने भगिन्यः अतीव प्रसन्ना दृश्यन्ते। प्रायेण अस्मिन् दिने भगिन्यः स्वपतिगृहात् भ्रातृगृहम् समागत्य भ्रातृणां हस्तेषु रक्षासूत्रं बध्नन्ति। भ्रातृभ्यश्च धनं वस्त्रादिकं लभन्ते। ब्राह्मणाश्च यजमानहस्तेषु रक्षाबन्धनम् विधाय दक्षिणा-द्रव्यम् आप्नुवन्ति।

अस्मिन् उत्सवे प्रतिगृहं घृतखण्डदुग्ध्युक्ताः सूत्रिकाः (सेवई) पच्यन्ते। धर्मप्राणाः जनाः तीर्थस्थानानि गत्वा दानं पुण्यञ्च कुर्वन्ति। नदीषु, सरोवरेषु च स्नानं कुर्वन्ति।

अयम् उत्सवः भारतीय संस्कृतेः उज्ज्वलतायाः एवं महत्तायाः सूचकोऽसि।

➡ (2) विजयादशमी (दशहरा)

[2017 NN]

भारतवर्षे अनेके विविधाश्च उत्सवाः प्रचलन्ति। यथा धार्मिकोत्सवाः, सामाजिकोत्सवाः, महापुरुषजन्मोत्सवाः राष्ट्रियोत्सवाश्च। एषूत्सवेषु धार्मिकोत्सवाः महत्त्वपूर्णाः। यतः भारतीयाःधर्मप्राणाः सन्ति। तेष्वपि विजयादशमी महोत्सवः विशेषेण महत्त्वपूर्णः अस्ति।

अयमुत्सवः आश्विनमासस्य शुक्लपक्षे दशम्यां तिथौ भवति। अस्मिन् समये वर्षर्तुः समाप्तिमुपयाति शरच्चागच्छति। मार्गाः अपङ्काः, सुखदं वातावरणम्, निर्मलम् आकाशं च सर्वमेव रुचिरं प्रतीयते। एवमनुश्रूयते यत् दशरथपुत्रेण श्रीरामचन्द्रेण अस्मिन्नेव दिने राक्षसराजरावणस्य विनाशाय लङ्कायाम् आक्रमणम् कृतम्। पुरा क्षत्रिया अस्मिन्नेव दिने शस्त्राणां पूजां विधाय युद्धार्थं प्रस्थानम् अकुर्वन्। इदमपि कथ्यते यत् महादेव्या भगवत्या काल्या अस्मिन्नेव दिने असुराणां विनाशः कृतः।

इममुत्सवम् प्राधान्येन क्षत्रियाः अभिनन्दन्ति। पुरा अस्मिन्नेव दिने राजगृहेषु महान् उत्सवः अभवत्। यद्यपि सम्प्रति राज्ञां नामशेषमेव जातं तत्र उत्सवः सम्पद्यते। क्षत्रियवर्णम् अन्तरेण अन्ये वर्णा अपि इममुत्सवं सोल्लासम् अभिनन्दन्ति। क्षत्रियाः ब्राह्मणाः वैश्याः शूद्राश्च सर्व एव अस्मिन् उत्सवे उल्लसन्ति।

अस्मिन् अवसरे समस्ते भारते ग्रामे-ग्रामे, नगरे-नगरे च रामलीलायाः प्रदर्शनं भवति। असंख्याः जनाः आबालवृद्धाः रामलीलोत्सवं द्रष्टुम् गच्छन्ति तत्र रावणवधं, तद्दहनं च दृष्ट्वा आमोदन्ते। अस्योत्सवस्य प्रधानः सन्देशः अस्ति यत् दशसु इन्द्रियेषु विजयः प्राप्तव्यः। यदि वयं स्वेन्द्रियाणि संयम्य रावणरूपम् अहंकारम् नक्ष्यामस्तु तदा वयं नूनं संसारे विजयं प्राप्स्यामः।

➡ (3) मित्रम् (सन्मित्रम्)

[2020 ZR]

मनुष्यः सामाजिकः प्राणी। समाजे एव तस्य सत्ता। न हि समाजं बिना स जीवितुं शक्नोति। सामाजिकजीवने मित्राणाम् आवश्यकता भवति। एकाकिनः कस्यापि कार्याणि न हि सिद्ध्यन्ति।

परं मित्रं कीदृशं भवेदिति विचारणीयम्। मित्रस्य निर्वाचने सावधानतायाः आवश्यकता भवति। संसारे अनेकानि मित्राणि मिलन्ति। स्वार्थं साधयितुम् एव तेषां मित्रता भवति। यावत्ते खादितुं स्वादु भोजनं पातुं, मधुरं पेयं च लभन्ते, तावत्तेषां मित्रता। आवश्यकतासमये ते दूरीतिष्ठन्ति। आपत्ति समये ते नालपन्ति। एतादृशैः मित्रैः न कोऽपि लाभः अपितु हानिर्भवति। सत्यमुक्तं केनापि कविना–

''परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्जयेत् तादृशं मित्रं, विषकुम्भं पयोमुखम्॥''

सन्मित्रम् तु वस्तुतः ईश्वरीयं वरदानम्। येन सन्मित्रं प्राप्तं तस्य जीवनं सफलं जातम्। सन्मित्रं पापान्निवारयति। हिताय योजयते, मित्रस्य गोप्यं रहस्यं निगूहति, गुणान् प्रकटी करोति। आपत्तिकाले मित्रस्य साहाय्यं करोति। आवश्यकतासमये धनमपि ददाति। स स्वयं कष्टानि अनुभूयापि मित्रस्य रक्षां करोति। एतादृशं यस्य मित्रं, स तु भाग्यशाली भवति। एतदेव च सद्भिः सन्मित्रलक्षणम् उच्यते।

सन्मित्रं कार्यसिद्धेः द्वारं भवति। मित्रसाहाय्येनैव महान्ति कार्याणि सिध्यन्ति। विभीषण-सुग्रीवादि मित्र साहाय्येन रामः बलवतः राक्षसान् व्यनाशयत्। कृष्णस्य साहाय्येनैव चार्जुनः महाभारतं नाम युद्धं जिगाय, अतः मित्रं संसारस्य अमूल्यं रत्नं कथ्यते।

➡ (4) सत्संगतिः *अथवा* सत्संगतिः कथय किं न करोति पुंसाम्

[2010 CJ, 11 ID, HX, 13 BJ, BN, 14 CS, CW, 15 DT, 17 NO, 19 DB, DD, DF]

सतां सद्भिःसंगः कथमपि हि पुण्येन भवति। [2016 TP]

सतां जनानां सङ्गतिः 'सत्सङ्गतिः' कथ्यते। सत्सङ्गतिः जनानां सर्वकार्य-साधिका इति सुनिश्चितम्। मानवः सामाजिकप्राणी विशेषः अतः समाजं बिना तस्य किमपि महत्त्वं न विद्यते। सत्संगत्या जनः समाजे समुन्नतं पदं प्राप्नोति। सुदामा श्रीकृष्णस्य सखा आसीत्। सुग्रीव–विभीषणादयो रामसङ्गात् श्रेयः प्राप्तुवन्। श्रीकृष्णस्य संगतिकारणेन एव सुदामा दारिद्र्यं परित्यज्य परमैश्वर्यशाली अभवत्।अजामिलोऽपि सतां सङ्गात् नारायणलोके जगाम। ऋषीणां संगत्या व्याधोऽपि ऋषिवाल्मीकिः अभवत्।

मानवः सज्जनैः सह सज्जनतां दुर्जनैः सह दुर्जनत्वम् च उपति। संगत्या विद्या वृद्धिर्भवति कीर्तिश्च वर्धते। दुर्जनानां संसर्गेण बुद्धिर्दूषिता भवति कीर्तिः नश्यति च। बालकः दुर्जनैः सह सङ्गतिः कदापि न कार्या। सज्जनानां मार्गमनुसरन् को नु समुन्नति शिखरं न परिचुम्बति। सत्संगत्या मूर्खोऽपि विद्यावैभवेन विभाति, दुर्जनोऽपि सज्जनतां सम्प्राप्नोति, कुमार्गाद् सद्मार्गे समायाति।

यदि जनः श्रेष्ठं भवितुमिच्छति, तदा सदा स सत्संगतिः कुर्यात्। दुष्टानां संगतिः सदा अनर्थकारिणी भवति। सत्संगतिः बुद्धेः मूर्खताम् हरति। सत्संगतिः वाचि सत्यम् सिञ्चति। सत्संगतिः मानोन्नतिं दिशति। सत्संगतिः पापम् अपाकरोति। सत्संगतिः चेतः प्रसादयति। सत्संगतिः दिक्षु कीर्तिं तनोति। केनापि कविनां सत्यमुक्तम्–

'जाड्यं धियो हरति सिञ्चति वाचि सत्यं।
मानोन्नतिं दिशति पापमपाकरोति॥
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम्॥'

अतः सत्संगतिः मानवस्य मनोवृत्तिं परिवर्तयति। अनया पापोऽपि धर्मनिष्ठाः भवति। नलिनीपत्रस्थिताः जलकणाः मौक्तिकीं द्युतिम् आवहन्ति।

➡ (5) विद्याधनं सर्वधनंप्रधानम् अन्य शीर्षक

[2011 IA, HX, 13 BJ, BM, 14 CX, CY, 17 NP, 19 CZ, DC, 20 ZQ, ZS]

किं किं न साधयति कल्पलतेव विद्या [2017 NL]

विद्याविहीनः पशुः [2013 BP, BL, TJ, 16 TJ]

विद्या ददाति विनयम् [2011 HZ]
विद्या महत्त्वम् [2010 CG, 13 BK]
विद्या अमृतमश्नुते [2017 NN]
विद्या धर्मेण शोभते [2010 CK]
विद्यायाः उपयोगिता
विद्या महिमा [2013 BO]
विद्या प्रभावः [2016 TP]

विद्यते सद् असद् ज्ञानं अनया सा विद्या कथ्यते। विद्या विनयं ददाति। विनयात् पात्रतां प्राप्यते पात्रत्वात् धनं प्राप्यते धनाद् धर्मं प्राप्यते तत्पश्चात् सुखं लभते। यदुक्तम् –

विद्या ददाति विनयं विनयाद् याति पात्रताम्।
पात्रत्वात् धनमाप्नोति धनाद् धर्मस्ततः सुखम्॥

अन्यं धनं व्यये कृते नश्यति किन्तु विद्याधनं व्यये कृते वर्धते। विद्याधनं चौरोऽपि चोरयितुं न शक्नोति, नृपः अपहर्तुं न शक्नोति। अन्य सुवर्णादिकं धनं भ्रातृषु विभज्यते किन्तु विद्याधनं भ्रातृषु न विभज्यते। केन कविना सत्यमेव उक्तम् –

न चौरहार्यं न च राजहार्यं,
न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धति एव नित्यम्,
विद्या धनं सर्वधनंप्रधानम्॥

विद्यया शोभा भवति। विद्ययैव मनुष्यः ज्ञानार्जनम् करोति। विद्या बुद्धेः मूर्खतां हरति। विद्या दिशासु कीर्तिम् प्रसारयति। विद्या विदेशगमने स्वबन्धुजनः भवति। अतएव विद्याविहीनः जनः पशुः भवति। विद्यासर्वस्य भूषणम् अस्ति। विद्या गुरूणां गुरुः। विद्या नराय धनं ददाति, यशः ददाति, सुखं ददाति, सम्मानं च ददाति। अन्यानि धनानि सञ्चयात् पुष्टतां वृद्धिं च यान्ति परञ्च विद्याधनं सञ्चयात् अदानात् वा नित्यं क्षयं याति। विद्यायाः कोशः अपूर्वः अद्भुतः च। विद्यया एव विदुषः नरस्य सर्वत्र सम्मानः भवति। विद्याप्रभावेण एव ऋषयः मुनयः विद्वान्सः कवयश्च अमराः जाताः।

विद्या कल्पलता इव सर्वकार्यसाधिका अस्ति। विद्या माता इव रक्षति, पिता इव हिते नियुङ्क्ते, कान्ता इव खेदम् अपनयति। विद्या सर्वसुखानां कारणम् अस्ति। विद्या लक्ष्मीं तनोति। विद्यया एव यशः वर्धते। राजा तु स्वदेशे पूज्यते, परन्तु विद्वान् सर्वत्र पूज्यते। विद्यायां देशस्यापि प्रतिबन्ध नास्ति। राजानोऽपि तस्याः पुरस्तात् नतमस्तकाः भवन्ति–

'स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।'

विद्या मानवाय यशः प्रददाति, सुखं सम्मानं च यच्छति। विद्यया शोभा भवति, विद्यया एव मानवः ज्ञानार्जनं करोति। मानवजीवने विद्या तु एका कल्पलता वर्तते। रूपयौवनसम्पन्नोऽपि विद्याविहीनः जनः न शोभते। राजसु विद्या एव पूज्यते धनं न पूज्यते।

विद्याविहीनः मानवः पशुतुल्यः भवति। मानवजीवने विद्याधनं श्रेष्ठं धनम् अस्ति। अतः सर्वे जनाः स्वपुत्र-पौत्रान् पुत्रीश्च सम्यग् रूपेण पाठयेयुः। वर्तमानसमये तु विद्यायाः अतीव आवश्यकता वर्तते। सत्यमेव उक्तम्—

'विद्याधनं सर्वधनं प्रधानम्।'

➡ (6) उद्योगः

[2008 EU, EZ, 19 DB]

अन्य शीर्षक

- **श्रमेणैव सिध्यन्ति कार्याणि**
- **उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः** [2017 NK, 18 BN]
- **श्रमस्य महत्त्वम्**
- **उद्योगः सर्वसाधनम्**

- **उद्यमः** [2011 ID, 13 BN]
- **उद्योगिनं पुरुषं सिंहम् उपैति लक्ष्मीः** [2011 ID, 14 CY]
- **उद्योग महत्त्वम्**

संसारे सर्व एव मानवाः सुखमयं जीवनम् कामयते। परञ्च इदं केचिदेव जानन्ति इह सुखमयं जीवनं कथं प्राप्यते? जीवनं सुखमयं विधातुं सुखं शान्तिश्च अपेक्षते। जीवनं पुरुषार्थेनैव चलति। अतः मानवः पुरुषार्थी, उद्यमी भवेत्। अकर्मणि कदापि प्रवृत्तिर्न विधेया।

मनुष्यस्य यदि कश्चिच्छत्रुरस्ति तत् तु आलस्यमेव वर्तते। उक्तञ्चापि—

''आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।''

आलस्यं नाम अनुद्योगः। उद्योगशीला एव जनाः सर्वदुखानि विहाय सुखानि समृद्धिं च अनुभवन्ति। उद्योगेन भाग्यमपि परिवर्तयितुं शक्यते। अनुद्योगेन वयं जगति कर्मं कर्तुमसमर्थाः। अनुद्योगः नरस्य शत्रुवर्तते।

उद्यमेनैव नरेण अनेकानि शान्तिकार्याणि कृतानि। उद्यमम् आश्रित्य एवं मनुष्येण रेलवायुयान विद्युत् परमाणुः इत्यादि विविध प्रकाराः आविष्काराः कृताः। अधुना मानवः उद्यमेनैव चन्द्रादि उपग्रहेषु गमनस्य प्रभृतिभिः असम्भवानि दुष्कराणि च कार्याणि सम्पादयति। कथितं च–

उद्योगशीला एव जनाः सर्वदुःखानि विहाय सुखानि समृद्धि च अनुभवन्ति। संसारे उद्योगस्य महन्महत्वं सर्वैः स्वीकृतमस्ति। उद्यमी मानवः एव आत्मपौरुषेण स्वाभीष्टसिद्धिम् अनायासेनैव लभते। उद्यमी जनः असम्भवमपि सम्भवं विधातुं शक्नोति। उक्तञ्चापि—

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥

अतः सर्वैरप्युद्योगोऽवश्यमेव कर्तव्यः।

➨ (7) भारतीया संस्कृतिः

[2012 HF, 13 BK, 14 CV, 15 DT, 17 NN, 20 ZQ]

संस्करणं, परिष्करणं चेतसः आत्मनोः वा इति संस्कृतिः कथ्यते। संस्कृतिः मानव मनसोऽज्ञानं दूरी करोति। चित्तभयमपहरति, अविवेकान्धकारम् अपनयति, ज्ञानज्योतिप्रकाशयति, शान्तिमादधाति, कल्याणं विस्तारयति, ज्ञानं विकासयति च। किम्बहुना संस्कृति मानवस्य सर्वविधम् अकल्याणं दूरीकृत्य तस्मिन् कल्याणं आदधाति।

सर्वेषां राष्ट्राणां स्वकीया संस्कृतिः भवति। अस्माकं भारतराष्ट्रस्यापि स्वकीया संस्कृतिः अस्ति, या भारतीया संस्कृतिः कथ्यते। इयं संस्कृतिः विश्वस्य प्राचीनतमासु संस्कृतिषु प्रधानतमा अस्ति।

अस्यां संस्कृतौ धार्मिकभावनायाः प्रचुरता अस्ति। जीवनस्य प्रतिक्षेत्रे धर्मस्य विधानम् अस्ति। भोजन व्यापारे राजनीतौ व्यवहारै, पठने, शयने, किम्बहुना सर्वास्वपि जीवनचर्यासु धर्मस्यैव विधानं दृश्यते। अस्यां संस्कृतौ, सर्वत्र आध्यात्मिकत्वं दृश्यते। भौतिक लिप्सां त्यक्त्वा आत्मज्ञानं कृत्वा मोक्ष प्राप्तिः एष भारतीयानां परमं लक्ष्यम्।

भारतीया संस्कृतिः विश्वस्त न केवलं मनुष्येषु अपितु चराचरात्मकेषु प्राणिषु पदार्थेषु च एकस्यैव परमात्मनो विभूतिम् पश्यति। अतएव भारतीयाः ऋषयः कल्याणम् ऐच्छन्—

''सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुखभाग् भवेत्॥''

➨ (8) संस्कृतभाषायाः महत्त्वम्

[2010 CH, 11 HX, 12 HG, HH, 13 BM, 14 CV, CW, CX, 16 TK, 17 NJ, NP, 19 DC, DD, 20 ZT, ZU]

अथवा, **संस्कृत भाषा**

अथवा, **संस्कृत शिक्षणस्य उपयोगिता**

अथवा, **संस्कृताध्ययनस्य महत्त्वम्** [2017 NK]
अथवा, **संस्कृतम् नाम दैवीवाक**
अथवा, **देवभाषा-महत्त्वम्** [2010 CG]
अथवा, **संस्कृत शिक्षायाः वर्तमान स्वरूपम्** [2012 HE]
अथवा, **देवभाषायाः वर्तमानं स्वरूपम्** [2017 NO]

संस्कृतभाषा विश्वस्य सर्वासु भाषासु प्राचीनतमा, सर्वोत्कृष्ट-साहित्य समन्वित च अस्ति। इयमेव सर्वासाम् आर्यभाषाणाम् जननी मता। इयं भाषा वैदिक भाषातोः निःसृताऽस्ति। विद्यमानेषु निखिलेषु अपि साहित्येषु अस्याः भाषायाः साहित्यं सुविपुलं, सर्वश्रेष्ठं सुसम्पन्नञ्चास्ति। तत्र ग्रन्थानां संख्या पञ्चाशत सहस्राद् अपि अधिका वर्तते। वैदिके साहित्ये मन्त्रसंहितात्मक ऋग्वेदयजुर्वेदसामवेदाथर्ववेद-ब्राह्मणआरण्यकउपनिषत्सूत्रग्रन्थाः प्रातिशाख्यअनुक्रमणीग्रन्थाः समायान्ति। लौकिके साहित्ये रामायण-महाभारतपुराणस्मृतिदर्शनकाव्यग्रन्थादयः परिगणिताः भवन्ति। इदं समग्रमेव वाङ्मय अभ्युदय निःश्रेयस् मूलमभिमन्यते। अत्र आधुनिक भौतिक विज्ञानमपि बीजरूपेण विवेचितमस्ति। संसारस्य कस्याऽपि भाषायाः साहित्यं संस्कृतसाहित्यस्य साम्यं नैवाधिगच्छति। अतएव संस्कृतस्य गौरवम्, आचार्यवरोः दण्डी इत्थं सत्यमेव उक्तम्– 'संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभिः'।

संस्कृत साहित्यं नवभिः रसैः विभूषितम्, रीतिगुणालंकारादिभिः समलङ्कृतञ्च अस्ति रसादिध्वनिः अस्यात्मा। वैज्ञानिकञ्च अस्याः व्याकरणं सुनिश्चितं कं सुधियं नो मोहयति। अत्र गद्ये पद्ये च लालित्यं भावबोध सामर्थ्यमद्वितीयमस्ति। चरित्रनिर्माणाय यादृशीं प्रेरणा संस्कृतसाहित्यं प्रददाति, तादृशीं प्रेरणाम् अन्यत्साहित्यं न ददाति।

अस्याः भाषायाः वैशिष्ट्मस्याः व्याकरणापि ज्ञायते। अस्य मूलं यद्यपि ब्राह्मणग्रन्थेषु प्रातिशाख्यग्रन्थेषु च द्रष्टुं शक्यते परन्तु महर्षेः पाणिनेः अष्टाध्यायी, अस्याः महर्षि पतञ्जलिप्रणीतं महाभाष्यं तथा कात्यायनकृताः वार्तिका संस्कृत व्याकरणस्य महनीयं महत्त्वं ख्यापयन्ति। व्याकरणज्ञानमन्तरेण कथमपि संस्कृतस्य स्वर्णिम ज्ञान खनौ प्रवेशः कर्तुं नो शक्यते। संस्कृतस्य नैकाभिः विशेषताभिः सार्द्धं वैशिष्ट्यद्वयं प्रामुख्यं धत्ते।

भारतमातुः स्वातन्त्र्यं गौरवमखण्डत्वञ्च संस्कृतेन एव वेदितुं सुरक्षितुञ्च शक्यन्ते। यत् इयं देववाणी सर्वासु भाषासु प्राचीनतमा श्रेष्ठा च ज्ञानविज्ञानदृष्ट्या सुसमृद्धा अतएव विद्वद्भिः तत्तद्ग्रन्थानामंशैः अस्याः वैज्ञानिकत्वं सेद्धव्यम्, अन्यासां भाषाणां साहित्ये च तस्या एव अनुकरणं प्रदर्शनीयम्। तदैव आधुनिकः शिक्षितः जनः अनुभविष्यति, निश्चेष्यति च।

➡ (9) अनुशासन

[2010 CK, 11 IB]

अन्य शीर्षक

- **अनुशासन समस्या**
- **अनुशासनम् एव शिक्षायाः मुख्य लक्ष्यम्**
- **जीवने अनुशासनस्य महत्त्वम्** [2016TK]

पूर्व निश्चितानां नियमानां ज्येष्ठानाम् आज्ञायाश्च पालनमेव अनुशासनम् कथ्यते। अनु उपसर्ग पूर्वक 'शास्' धातोः 'ल्युट्' प्रत्यय करणेन अनुशासन शब्दः सिद्धयति। संयमः वा आत्मनियन्त्रणाम् एतस्य शाब्दिकः अर्थः। संसारस्य आधारः अनुशासनमेव वर्तते। दार्शनिकाः स्वीकुर्वन्ति यत् सत्वरजस्तमासि मिलित्वा जगत् रचयन्ति। प्रकृतौ सर्वे पदार्थाः अनुशासनबद्धा सन्ति। यथा सूर्यः अनुशासनेन संसारं प्रकाशयति। चन्द्रः नक्षत्राणि अनुशासनं पालयन्ति। अस्याः निखिलायां व्यवस्थायाम् अनुशासनं निहितमास्ते।

अद्य प्रायः विद्यार्थिनः अनुशासनहीनाः सञ्जाताः सन्ति। अयं महद्दुःखस्य विषयः अस्ति यत् भारतस्य प्रशासनेऽपि अनुशासनहीनता व्याप्तास्ति। अनुशासनेन हीनाः चरित्रेण भ्रष्टाः नेतारः भारतीयां राजनीतिम् अधोगतिं प्रति नयन्ति। पतितास्ते राजनीतिं दूषयन्तः भारतीयं जीवनं तिमिरेण आच्छादयन्ति। विधाता एवं सर्वथा रक्षिष्यति भारतम्। गुरुकुलेषु, विद्यालयेषु पाठशालासु चाव्यवस्थायां मूलकारणमनुशासनहीनतैव। न केवलं सामान्यव्यवहारे अनुशासनस्यमहत्त्वमपितु राज्यसञ्चालने, राष्ट्रसंचालने, चानुशासनगौरवमेव जागर्ति। सैनिकाः देशरक्षार्थं स्वात्मानं तृणवत्पातयन्ति न गणयन्ति दुःखपयोधि न स्मरन्ति प्रियशिशून् तत्रकारणमिदमेव यत्तेऽनुशासने स्थिताः सन्ति।

शिक्षायाः उद्देश्यम् जीवनस्य सर्व प्रकारेण उन्नतिकरम् अस्ति। उन्नतिः अनुशासनं बिना असम्भवः अतः अनुशासनं शिक्षायाः,

मुख्यम् लक्ष्यं कथ्यते अनुशासनेन बिना विद्यार्थिनः स्वगुरुणाम् आज्ञापालनं न करिष्यन्ति, अध्ययनं प्रति सावधानाः न भविष्यन्ति। अतस्ते शिक्षणकाले किमपि न ज्ञास्यन्ति। अतएव सत्यमुच्यते–अनुशासनम् एव शिक्षायाः मुख्यं लक्ष्यम्।

➠ (10) जननी जन्मभूमिश्च स्वर्गादपि गरीयसी

अन्य शीर्षक

- **देश सेवा**
- **देशभक्तिः**
- **स्वर्गादपि गरीयसी जन्मभूमि**

'जनयतीति जननी' इत्यन्वयार्थत्वात् जन्मदात्री एव जननी कथ्यते। जन्मनः भूमिरित्यर्थत्वात् जन्मग्रहणभूमिश्च जन्मभूमिर्भवति। उभे अपि जयायस्यौ इति हि अस्याः सूक्ते अर्थः स्वर्ग पावनः पूज्यः सुखप्रदश्चादि। त्रिष्वपि गुणेषु जननी जन्मभूमिश्च स्वर्गादपि गुरुतरे भवतः इत्यत्र मनागपि सन्देहो नास्ति।

पावनत्वम् पावयति पवित्रता सम्पादयतीति पावनः कथ्यते। जननी हृदयः पुत्रं प्रति या स्नेहधारा प्रवहति स त्रैलोक्यपावनी गंगेव पुत्रहृदयं घृणाद्वेषादिदोषान् दूरीकृत्य पावयति इति तु आधुनिकः बालमनोविज्ञानाचार्यः सिद्धकृतम् मातृस्नेहहीनाः बालकाः प्रायेण जीवने अपराधिनः भवन्ति। अतः जननी स्वर्गादपि पावनतरा वर्तते।

जननी पुत्र पालने असंख्यान् क्लेशान् सहते स्वयं आर्द्रवस्त्रेषु शयित्वा स्वपुत्रं शुष्कवस्त्रेषु शाययति। स्वयं बुभुक्षिताऽपि सती पूर्व भोजयति अतः सा सर्वथा पूजनीयां सुखपदत्वम् मातुः' अङ्के यत् सुखं प्राप्यते, तत्सुखम् कुत्रापि न लभ्यते। पशु पक्षिणोऽपि मातुः अङ्के आनन्दातिरेकम् अनुभवन्ति, किम्पुनः मानवाः।

यथा जन्मदात्री जननी वन्दनीया तथैव जन्मभूमिरपि सर्वैः अभिनन्दनीया स्पृहणीया च जन्मभूमिं प्रति मानवस्य स्वाभाविकं प्रेम जन्मतः एव भवति। ये स्वजन्मभूमिं प्रति अनुरागं रक्षन्ति ते धन्या सन्ति। विरला एव पुरुषाः जन्मभूमिं प्रति अनुरागहीनाः भवन्ति। ईदृशाः जनाः कृतघ्नाः राक्षसाः वा भवेयुः। वेदेषु पुराणेषु जन्मभूमेरत्यन्तं महत्त्वं दृश्यते। देवानां जन्म भारत-भूमौ समभवत्। अतएव देवाः अपि तस्य महिमानं गायन्ति। स्वातन्त्र्य संग्रामे तु असंख्याः देशभक्ताः स्वमातृभूमिप्रेमणिश्च भारतभूम्या अवतारं गृहीतवन्तः। महाराज्ञी लक्ष्मीबाई, तात्यां टोपे, तिलक, मालवीय, पटेल, सुभाष, गान्धी, मोतीलाल, जवाहर, भगतसिंह, महाभागानां स्वदेशभक्तिं दर्शं दर्शं विस्मिताः व्याकुलाः सन्तः आंग्लाः भारतं विहाय स्वदेशं प्रति प्रस्थानमकुर्वन्। सखेदं लिख्यते यदद्य तु, भारतभूमे, कतिपयाः पुत्राः स्वमातरं स्वबन्धुरक्तेन रञ्जयन्ति। तेऽद्य निर्दोष जनानां कदनं कुर्वन्ति। ये पूर्वं रक्षकाः आसन् ते साम्प्रतं राक्षसायन्ते, असुरायन्ते च जन्मभूमिं विखण्डयितुं प्रयतन्ते।

ऋषीणां देश रामकृष्णयोः जन्मभूम्यां कीदृशीयं विडम्बना यद् भ्राता एव स्वभ्रातुः शत्रुः सञ्जातोऽस्ति, 'अतएव जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इतीमां वाणीमुद्घोषयितारम् ऋषिवरं बाल्मीकिं वयं कथङ्कारं प्रसादयितुं शक्ष्यामः। तथापि स्वमनसि नैराश्यं नैवानेयम्। विपत्तिकाले धैर्यमवलम्बनीयम्। स्वमातरं जन्मभूमिं भारतवर्षं प्रति मनसा वाचा कर्मणा सद्भक्तिरेव आचरणीया।

➠ (11) सदाचारः

[2014 CU, 19 DB, 20 ZO, ZR, ZT]

अन्य शीर्षक

- **आचारः प्रथमो धर्मः** [2010 CI]
- **शीलं परं भूषणम्**
- **आचारः परमो धर्मः** [2010 CJ, 17 NL, 18 BN, 19 CZ, DA, DC, DE]

सत् आचरणमेव सदाचारः कथ्यते। यथा सत्पुरुषाः आचरन्ति तथैव आचरणमपि सदाचारः उच्यते। उत्तमजीवनस्य सर्वोत्तमं साधनं सदाचार एव अस्ति। सदाचारवान् नरः सुखं प्राप्नोति। स धार्मिको, बुद्धिमान् दीर्घायुश्च भवति। सदाचारस्य अन्याः बहवः गुणाः सन्ति। यथा माता पितरौ गुरूणां च आज्ञायाः पालनं वन्दनं च अहिंसा, परोपकारः, नम्रता, दयादयश्च। सत्यमेव उक्तम्

आचाराल्लभते ह्यायुराचारादीप्तिताः प्रजाः।
आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम्॥

सामाजिकोत्थानाय सदाचारस्य महती आवश्यकता वर्तते। यः जनः सत्यं वदति, नित्यं माता-पितरौ अभिवादयति, गुरुजनानाम् आदरं करोति, परोपकारं च करोति, तस्य जनस्य आयुर्विद्यादि वद्धन्ते।

अभिवादनशीलस्य नृत्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशोबलम्॥

मूर्खाणामेव जीवनं सदाचारविहीनं भवति। सोऽल्पायुः भवति तस्य सर्वत्र निरादरो भवति। आचारहीनः पुरुषः धर्महीनः पुण्यहीनश्च भवति। सदाचारेण नरस्य आदरो भवति। जगति तस्य प्रतिष्ठा भवति। अस्माकं देशे काले-काले बहवः सदाचारिणोऽभवन्। सदाचारेण श्रीरामचन्द्रः मर्यादा पुरुषोत्तमोऽभवत् राणासेतारादयोपि सदाचारिणः आसन्। सदाचारेण मानवः राष्ट्रस्य समाजस्य च कल्याणं कर्तुं शक्नोति। अतोऽस्माभिः सदाचारस्य पालनं कर्तव्यम् मनुनाप्युक्तम्–

सर्वलक्षणहीनोऽपि यः सदाचारवान् नरः।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति॥

➡ (12) अस्माकं विद्यालयः

[2012 HF, 13 BN, 14 CV, 19 CZ, 20 ZT, ZU]

अन्य शीर्षक

- **अस्माकं महाविद्यालयः** [2011 IA]
- **मम विद्यालयः**

मानवः स्वभावतः एव जिज्ञासुः वर्तते। जिज्ञासमाना एव मानवः किमपि कर्तुं समर्थाः। ज्ञान-पिपासां प्रशमयिमेव मानवैं विविधाः प्रयासाः कृताः। मानवप्रयासपरिणतिरेव विद्यालयानां संस्थापना। एतादृशानां प्रयासानामेव फलमस्ति मम विद्यालयः तत्र वयं ग्रामीणाः छात्रां विद्याध्ययनं कुर्मः। मम विद्यालयः नगरस्य पूर्वस्यां दिशि स्थितः, अयम् च नगरस्य श्रेष्ठः विद्यालयः अस्ति।

मम विद्यालये सप्तत्रिंशत् कक्षाः द्वेसहस्रे छात्राः च सन्ति। विद्यालये एकः विशालः कक्षः अस्ति, अस्मिन् कक्षे विद्यालयस्य विभिन्नोत्सवानाम् आयोजयन्ति। अस्माकं विद्यालयस्य विशालं सुन्दरं च भवनं दर्शकानां चेतांसि हरति। विज्ञान-कलादीनां पृथक्-पृथक् सुशोभनाः कक्षाः विद्यन्ते। मम विद्यालये एकः पुस्तकालयः अस्ति। अत्र एकः वाचनालयः, षड् प्रयोगशालाः च सन्ति। विद्यालयस्य मध्ये सुशोभनम् उपवनं, विशाल क्रीडाङ्गनं जलधारा यन्त्रम् च सन्ति। मम विद्यालये एकोनत्रिंशत् अध्यापकाः सन्ति।

मम विद्यालयस्य प्रधानाचार्यः पूज्यपाद; श्री यज्ञदत्तः विविध विषयेषु पारङ्गतः, परन्तु संस्कृत विषये तु तस्याधिकार एव। सः एकः व्यवहारकुशलशीलवान् विनयसम्पन्नः सफलवक्ता प्रधानाचार्यः अस्ति। मम विद्यालयस्य अध्यापकाः विविधविद्याप्रवीणाः सन्ति। सर्वे एव स्व-स्व विषये पारङ्गताः सन्ति। अत्र न केवलं पठनं-पाठनं च भवति, अपितु सदाचारस्य पाठोऽपि पाठ्यते, देशभक्तेः समाजसेवाः, च भावाः अपि छात्राः गृहण्न्ति।

अस्मिन् विद्यालये एन.सी.सी., बालचरशिक्षायाः अपि सुप्रबन्धोऽस्ति। ते छात्राः क्रीडनादि प्रतियोगितासु प्रथमं स्थानं प्राप्नुवन्ति, ते पुरस्कारादिकमपि लभन्ये। साम्प्रतम् अस्माकम् एतत् कर्त्तव्यमस्ति यत् वयं विद्यालयस्य कीर्ति सर्वतः प्रसारयितुं प्रयतेम।

➡ (13) सत्यमेव जयते नानृतम्

[2012 HG, 17 NP]

अन्य शीर्षक

- **न हि सत्यात्परोधर्मः**
- **सत्ये सर्वं प्रतिष्ठितम्** (2017 NN)

मानवधर्मस्य सारभूतं तत्त्वम् इदं सत्यं किमस्ति? किमस्य स्वरूपमिति जिज्ञासायां भारतीयाः वैज्ञानिकाः ऋषयः कथयन्ति यद् आत्मनः स्वरूपमेव सत्यम्। अथवा ईश्वरस्य वा परमसत्तायाः स्वभाव एक सत्यम्। अथवा विविधरूपवत्यां प्रकृत्यां यः शाश्वतः वा सनातनः नियमः स एव सत्यम् वा ऋतमिति कथ्यते। ईश्वरः सत्येनैव जगतः निर्माणं करोति। अनेनैव इदं पालयति अन्ते सत्येन एव जगत् संहरति। इत्थं परमेश्वरस्य जगतः निर्माणपालनं संहारकार्येषु सत्यमेव सहायकं भवति। दयानन्देन सत्यमेव

कथितम् – 'सत्याचरणमेव धर्मः' जगतः प्रतिष्ठा सत्यम्। विधानं साधनं वा सत्यम् साध्यं सत्यम्।

प्रकृतिः अपि ईश्वरस्य सत्यविधानं पालयन्ती दृश्यते। सूर्यः, चन्द्रः, ग्रहनक्षत्रादयः सत्यमेव पालयन्ति। ते सत्यधर्मात् अणुमात्रमपि नैव विचलन्ति। नद्यः पर्वताश्च सर्वे सत्यपरायणाः सन्ति। सूर्यः प्राचीं दिशं विहाय कदापि अन्यास्यां दिशायां नो उदयते तस्येयं सत्यनिष्ठास्ति। गन्धवती पृथिवी कदापि रसवती न भवति। इदमेव तस्याः सत्याचरणम्।

भारतीय संस्कृतेः विशेषतासु सत्यं प्रथमं परिगण्यते। ततः परंशिवं सुन्दरञ्च अथवा अन्यानि तत्त्वानि समायान्ति। सत्यस्य पालने पूर्वं कष्टानि आगच्छन्ति। परन्तु यः धैर्येण तानि सहते सः परिणामे अमृतं लभते। हरिश्चन्द्रादयः सत्यं पालयन्तः व्यवहरन्तः च परमसत्यरूपं नारायणं साक्षात्कृतवन्तः।

किमधिकं सत्येन एव संसारः प्रचलति। सत्याभावे अस्य अस्तित्त्वं नश्यति सत्यस्य पालकाः कदापि पराजयं न लभन्ते। अतएव उक्तम् —

'सत्यमेव जयते नानृतम्'

➡ (14) विश्वशान्ति

संसारे न केवलं मनुष्याः अपितु सर्वे प्राणिनः शान्तिं कामयन्ते। कोऽपि दुःखं कष्टं वा नैव बाधति। अनेन स्पष्टं प्रतीयते यद् विश्वशान्तिभावना प्राणिषु स्वाभाविकी वर्तते। वेदाः भणन्ति — "मित्रस्य चक्षुषा समीक्षामहे", "मा गृधः कस्यस्विद्धनम्"। सर्वेषामीश्वरप्रार्थनायां विश्वशान्तिकामना प्राप्यते।

भारतस्य सर्वे दार्शनिकाः विश्वशान्त्यर्थं प्रयतमानाः दृश्यन्ते। इमे चिरशान्ते उपायान् अनेकधा वदन्ति। यथा भगवतः बुद्धस्य वाणी विश्वशान्ति भावपूता प्राणिनां शान्त्यर्थमेव प्रवृत्ता सती दृश्यते। तीर्थङ्कराणां जैनमुनीनां सर्वे उद्योगाः एतदर्थमेव सम्भूताः। एवं सत्यपि विश्वशान्तिरवः नैव अनुश्रूयते। स्त्रीबालहत्यादिकं, बलात्कारः श्रूयन्तेऽहर्निशं दृश्यन्ते च समाचारपत्रेषु व्रायश; अवलोक्यन्ते इत्थमत्र संसारे विग्रहस्य वातावरणं प्रबलमास्तै। सः मनुष्यविनाशाय घातकानि अस्त्राणि निर्मिते प्रयुङ्क्ते च। अणुबम्ब-हाइड्रोजन बम्ब-आविष्कारैः एवंविधैः विश्वस्य वातावरणं संकटग्रस्तमशान्तिमयं वा सञ्जातम् अस्ति। अतएव अन्यानि राष्ट्राणि शान्त्यर्थं तृषितनेत्रैः भारतं प्रति अवलोकयन्ति। अतः मनुष्यतारक्षायै भारतीय मनुष्यैः गम्भीरतया चिन्तनीयम्। अस्मिन् भोगप्रधानं भौतिकवादे मानवजीवनस्य एकस्यैव पक्षस्य उन्नतिः भवति। परिपूर्णः विकासस्तु आध्यात्मिकीमुन्नतिं बिना न सम्भविष्यति। अतः चिरशान्त्यर्थम् आध्यात्मिकः विकासः कर्तव्यः। अनेन समग्रेऽपि विश्वे शान्तिः आगमिष्यति।

भारतेन स्वातन्त्र्यप्राप्तेः पश्चात् विश्वशान्तिदिशायां बहवः प्रयत्नाः विहिताः। भूतपूर्व प्रधानमन्त्रिणा जवाहर लाल नेहरू महोदयेन अनेक बारं संसारः युद्धविभीषिकातः संरक्षितः। भारतस्य वर्तमानशासनमपि घोषयति यत् अस्माभिः अणुशक्तिः मानवोपयोगिषु कार्येषु एव प्रयोज्या, मानवविनाशाय नैव विश्वशान्तेः प्रश्न, सम्पूर्णमानवतायाः प्रश्नः अस्ति। अतएव विश्वस्य समस्तैरेव मनुष्यैः अस्मिन् विषये भृशं चिन्तनीयम् तदनु आचरणीयम् भारतदेशः विषयेऽस्मिन् विशुद्धां भूमिकां निर्वोढुं शक्नोति चेत्सःभौतिकवादं प्रति आकर्षणं परित्यज्य आध्यात्मिकोन्नतिं स्वजीवनस्य परममुद्देश्यं निर्धारयेत्।

➡ (15) अस्माकं देशः

[2017 NP, 19 DE, 20 ZO, ZR, ZS]

अन्य शीर्षक

- **भारतवर्षम्**
- **महान् देशः**
- **भारत वैशिष्ट्यम्**
- **प्रियं भारतम्**
- **भारत राष्ट्रगौरवम्** [2010 CG]
- **विश्वगुरुः भारतदेशः** [2014 CV]

भारतम् अस्माकम् देशः अस्तिः। पर्वतानाम् राजा हिमालयः अस्य देशस्य प्रधानः पर्वतः अस्ति। सः अस्य उत्तरे मुकुटमणिरिव शोभते। रत्नाकरः सदा अस्य चरणौ प्रक्षालयति। ब्रह्मपुत्र गंगा-यमुना-सिन्धु-नर्मदा महानद्यादिनद्यः अस्य हृदयम् सिञ्चन्ति। अस्य प्राकृतिकी शोभा अनुपमा अस्ति। अत्र षण्णाम् सुन्दरः क्रमः अस्ति। चित्र विचित्रवर्णशाली सुगन्धपुष्पाणि बसन्ते संसारे अन्यत्र नास्ति। शरदृतोः दुग्ध धवला चन्द्रिका अन्यत्र कुत्रास्ति न।

अत्रत्य साहित्य दर्शनज्योतिषारायुर्वेदादीनि विश्वस्य प्राचीनतमानि साहित्यदर्शन-विज्ञानानि सन्ति। अत्रत्यऋग्वेदः विश्वस्य प्राचीनतमः लिखितग्रन्थः अस्ति। अत्रत्या संस्कृतिः विश्वस्य प्राचीनतमा संस्कृतिः अस्ति। वयमीदृशेसर्वश्रेष्ठ देशे जन्म लब्ध्वा धन्याः स्मः। इयं रमणीया भारतभूमिः धन्या। अस्या महिमा सर्वविदिता एव–

'धन्योऽयं भारत देशो धन्येयं सुरभारती।
तदुपासकाः वयं धन्याः अहो धन्यपरम्परा॥'

इयं खलु भारतभूमिः भगवतो नारायणस्य प्रियालीला स्थली बुद्ध-दयानन्द सदृशाः महात्मानः, कालिदास-भवभूति सदृशाः कवयश्च इमाम् एव भूमिं स्वजन्मना अलंचक्रुः। अस्मिन् देशे विविध-धर्मावलम्बिनः, विविध वेश-भूषा धारिणः, विविध भाषा भाषिणः जनाः वसन्ति। एतत् एव अस्माकं देशस्य महत् वैशिष्ट्यम् अस्ति।

''वसुधैव कुटुम्बकम्'' इत्यादि वेदोक्तवाक्यकदम्ब साफल्याय भगवता महात्मा बुद्धरूपेणावतारो गृहीतः। महात्मना बुद्धेनाखिले संसारे विश्वबन्धुत्वभावना प्रकटिता प्रेम व्यवहारश्च स्थापितः। अद्यापि जापान चीन-तिब्बतादि प्रदेशेषु बुद्ध ईश्वरवत् पूजितो विद्यते। गंगा-यमुना सरस्वति प्रभृतयः नद्यः स्वमधुर जलेन भारतवासिजनान् तर्पयन्ति हिमालयसदृशाः अगम्याः पर्वताः दुर्ग इव अत्र राजन्ते।

➡ (16) परोपकारः

[2011 IC, 13 BM, BL, 14 CU, 19 DB, DC, 20 ZT]

अन्य शीर्षक

- **परोपकाराय सतां विभूतयः** [2014 CY]
- **परोपकारस्य महत्त्वम्**
- **परोपकारः पुण्याय** [2010 CH]

